Gaekwad's Oriental Series
Published under the Authority of
the Maharaja Sayajirao University
of Baroda.

General Editor:
B. J. Sandesara,
M.A., Ph.D.

No. 150

श्रीमद्भूलोकमल्ल—श्रीसोमेश्वरदेवविरचितं

# विक्रमाङ्काभ्युदयम् ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

# VIKRAMĀṄKĀBHYUDAYAM

A Historical Sanskrit Campū

By

ŚRĪ SOMEŚVARADEVA OF KALYĀṆA

Edited by

**Murari Lal Nagar**
M.A., Sāhityācārya
Dip. in Lib. Science.


ORIENTAL INSTITUTE
BARODA
1966


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

FIRST EDITION
COPIES 500
1966

Printed by Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), Near Palace Gate, Palace Road, Baroda and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda, February, 1966.

Price Rs. 6=50

*Copies of this work can be had from :—*

*Manager,*
THE UNIVERSITY PUBLICATIONS SALES UNIT,
Near Palace Gate, Palace Road
BARODA

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# FOREWORD

The Vikramāṅkābhyudaya is a historical Campū by King Someśvara (12th century A. D.) of Kalyāṇa in ancient Karṇāṭa, who is famous as the author of the encyclopaedic work Mānasollāsa, already published in three volumes in the Gaekwad's Oriental Series. In Vikramāṅkābhyudaya, the royal author has described the life of his illustrious father; and though the work is found incomplete in the only known palm-leaf manuscript at Pāṭaṇ (N. Gujarat), it has sufficient historical and literary importance to deserve publication. Mr. Murari Lal Nagar, Sāhityācārya, has edited it for the Gaekwad's Oriental Series.

As Mr. Nagar was out of India when this work was due for publication, he could not spare time for a detailed Introduction. So we have reproduced here his Introductory paper about it, published in the Journal of the Oriental Institute, Vol. X, No. 4 (June 1961).

I thank Messers J. S. Pade and B. L. Shanbhogue, Research Officers in the Oriental Institute, for rendering valuable help in seeing the Vikramāṅkābhyudaya through the press.

I also take this opportunity to thank the University Grants Commission and the Government of Gujarat for jointly extending full financial aid towards the publication of this work.

Baroda,
February 18, 1966

B. J. SANDESARA
Director

P. P. Ac. Gunratnasuri M.S.                                        Jin Gun Aaradhak Trust

# INTRODUCTION

The poem *Vikramāṅkābhyudaya* belongs to a class of literary composition in Sanskrit which is still rare. Until the middle of the last century, when there was no historical poem as evidence, the modern Sanskritists, especially the foreigners, thought that the Sanskrit literature totally lacked such works. They even went to the extent of declaring the Sanskrit literature as un-historical. But, thanks to the great efforts of the Indologists, the search for Sanskrit Mss. has revealed many valuable works, which have proved that India did not lack historical poetry, and that Sanskrit poets were not averse to history.

Historical poems derive their value from the fact that a poet may be led away from the facts by his flights of imagination, yet his composition reveals many historical facts which serve as raw materials and which enable a historian to recompose the past on a sound basis. Sanskrit historical poetry is doubly valuable, since there are not many histories of India and a historiographer has to base his researches on evidences like inscriptions and coins, etc. Thus any new find in the field of Sanskrit historical poetry is most welcome.

The author of the *Vikramāṅkābhyudaya* is already known to the Sanskrit world as the composer of the great encyclopaedic work, entitled *Mānasollāsa* or *Abhilaṣitārthacintāmaṇi*, published in the Gaekwad's Oriental Series. King Someśvara Bhūlokamalla, the author of both the *Mānasollāsa* and *Vikramāṅkābhyudaya* was the son and successor of Cālukya Vikramāditya VI of the Western Cālukya dynasty, who ruled his kingdom from Kalyāṇa between 1076 to 1127 A.D. Someśvara, who followed him, ruled between 1127 to 1136 A.D. Bilhaṇa, the Kāshmirian, composed his *Vikramāṅkadevacarita* in praise of this Vikramāṅka and immortalised both his hero as well as his work.

Not satisfied by Bilhaṇa's work, as it were, Someśvara composed the *Vikramāṅkābhyudaya* in praise of his father, Vikramāditya VI. Someśvara belonged to a class of kings, who were blessed by the Goddess of Learning as well as the Goddess of Wealth. On account of his great erudition, Someśvara was called *Sarvajñacakravartī* and his works justify this epithet.

The work *Vikramāṅkābhyudaya* remained unpublished and, therefore, its contents were unknown to the Sanskrit world. It existed only in a palm-leaf Ms. belonging to the famous manuscript collection deposited in the Saṅghavī Pāḍā Jain Bhaṇḍār at Pāṭaṇ in Gujarāt. It belongs to the Laghupośālika branch of the Tapāgaccha. The work was first noticed by C. D. Dalal and is described on pages 85-86 of the Pāṭaṇ Ms. Catalogue where it appeors as No. 120. ( A Descriptive Catalogue of Manuscripts in the Jain Bhaṇḍāras at Pattan, compiled

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

from the notes of the Late Mr. C. D. Dalal, with introduction, indices and appendices by Lalchandra Bhagwandas Gandhi, in two volumes, Vol. 1 : Palm-leaf Mss. Baroda, Oriental Institute, 1937.)

The *catalogue* also reproduces the following colophon:

"End इति महाराजाधिराज श्रीपरमेश्वरसत्याश्रयकुलतिलकश्रीमङ्गलोकमल्लसोमेश्वरदेवविरचिते महाकाव्ये विक्रमाङ्काभ्युदयाख्ये जनपदवर्णनं नाम प्रथम उल्लासः ।

"The end is in the margins".

Without having an opportunity to examine the Ms., I just reproduced this information in my *Introduction* to the *Vikramāṅkadevacarita* (Banaras, 1945; Princess of Wales Saraswati Bhavana Texts Series, No. 82) in the following words:

पट्टणस्थ जैनभाण्डारे सोमेश्वर (तृतीय)—विरचितं विक्रमाङ्काभ्युदयाभिधानं चम्पूकाव्यं विद्यते । अत्र कविः स्वपितृविक्रमादित्य(षष्ठ)वृत्तान्तं न्यबध्नात् । परं तत्काव्यं खण्डितमिति महत्कष्टम् । विक्रमयौवराज्यं प्रतिपाद्य (प्रायः ८० पत्राणि) काव्यमेतद्विरमति । परं समाप्तिसूचनं पार्श्वतोऽस्तीति स्थानान्तरेऽप्यस्य प्रत्यन्तरसत्त्वं नासंभवि । परमद्य यावदेतन्न प्रकाशपथं प्रापेति शम् ।

It is a mistake to say that the end is in the margins. The colophon occurs twice in the extant work—first on folio 12b, where the first *ullāsa* (*janapadavarṇana*) ends, and secondly on folio 22b, where the second *ullāsa* (*nagarīvarṇana*) ends. Curiously enough, in both the places "परमेश्वरसत्याश्रयकुलतिलकश्रीमङ्गलोकमल्ल" these epithets are written *on* the margin as insertions! These are so important that their absence may lead one even to doubt whether the work was composed by Cālukya king Someśvara III! But no king would write a panegyric poem in praise of another king unless he was an ancestor or closely related. The question still remains, why did the scribe omit the same phrase in both the places? One is likely to conclude that the insertion is an addition—an after-thought and not an omission by the scribe.

The work which remained unpublished so far is published here from only one single Ms. deposited at Pāṭaṇ. Inquiries regarding the availability of another Ms. throughout India resulted in disappointment. Pāṭaṇ Ms. is unique. It was copied by a modern scribe in the year 1914 A.D. and the copy (Ac. No. 6061) is kept in the Oriental Institute, Baroda. It is very defective and totally useless.

The existing palm-leaf Ms. of Pāṭaṇ runs to 80 leaves of 9″ × 2″ size. There are four lines to a page. The time has taken its full toll on it. The leaves which are brittle by nature, are broken in many places; some parts are eaten away by insects; while in other spaces the letters are rubbed against and hence made illegible. It requires great perseverence, time and effort to decipher the text and make sense out of nonsense.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

In spite of all these defects the value of the work as a historical poem is unquestionable. As shown above, its subject-matter is the same which appealed to the great Kāshmirian poet Bilhaṇa, *i. e.* the life of king Tribhuvanamalla of Kalyāṇa.

The work begins with usual benedictory verses, some of them having long lacunae due to the age of the Ms., thus making the meaning obscure. All verses praise Lord Nārāyaṇa or his incarnations. The first *ullāsa* is devoted to the description of the Karṇāṭa country, with all its traditional phases. Beginning with the 2nd *ullāsu*, the poet describes the City of Kalyāṇa, the capital of the Cālukya kingdom, with all usual embellishments. It is to be noted that an *ullāsa* ends with verses. The whole 2nd *ullāsa* is devoted to *nagarīvarṇana.*

In that city of Kalyāṇa, there livedt he great king Trailokyamalla (Someśvara I) who beautified it and made her the best of all. He came of a dynasty, which was enriched by great kings beginning with Buddha and Puruuravas and ending in Kṣemaka, who are well-known in the *Purāṇas.* Thereafter, 59 kings ruled over the City of Ayodhyā, having defeated their rivals of the Solar dynasty. Then came the great king Satyāśraya, whose name is still associated with the Cālukya dynasty, since it is called *Satyāśrayakula.* All the emblems and epithets, which were later adopted by the kings of this dynasty, were acquired by this Satyāśraya. Satyāśraya was blessed by Śiva's boon with the name of Cālukya on the mountain Cālukya. This is the origin of the name of Cālukya, according to poet Someśvaradeva.

The poet then gives lengthy genealogy of the dynasty, in which he follows the Cālukya inscriptions. The following kings are enumerated: Jayasiṁha; Raṇarāga; Pulakeśin; Kīrtivarman; Maṅgalārṇava (Maṅgalīśa); Satyāśraya, who conquered in the battle king Śrī Harṣa, whose grandeur and valour were praised by Bāṇa: Eḍavari; Ādityavarman; Vikramāditya; Yuddhamalla; Vijayāditya, who conquered Siṁhala, Kāñcī, Veṅgi and Gaṅgapāṭikā; Kokkuli; Vikramāditya; Kīrtivarman; Bhīmaparākrama; Kīrtivarman; Tailapa; Mūrtivikramāditya; Bhīmadeva; and Aiyaṇa. His son was Vikramāditya, who married Bonthādevī, the daughter of Lakṣmaṇa, the ruler of Pāriyātra country in Cedimaṇḍala.

Meanwhile, all *lokapālas*, the Goddess Earth, all masters of directions (*dikpatis*) and all gods, assembled and went to Lord Nārāyaṇa, who was resting in the Ocean of Milk. They informed him about their distress, upon which Lord Nārāyaṇa said: "I know the misdeeds of the wicked Rāṣṭrakūṭa demons. There is anarchy and lawlessness on the earth. The sacrifices are not being performed. Therefore, I will be born of Bonthādevī, the wife of Cālukya Vikramāditya, and will give protection to you all."

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Bonthādevi and Vikramāditya experience a divine dream: Lord Nārāyaṇa himself comes and sits on their lap. Tailapa is born. Someśvara enumerates all his *birudas* and mentions all his exploits, which are traditionally ascribed to him. He had three sons—Satyāśraya, Deśavarman and Pulakeśin. Of these Satyāśraya succeeded to the throne.

Daśavarman had five sons, of whom Vikramāditya received the throne from Satyāśraya, as Satyāśraya might have had no issue. Then ruled Aiyaṇa for some days. Then his younger brother Jayasiṁha became the king. His son was Āhavamalla, who was the overlord of the Kalyāṇapura, described above.

Someśvaradeva devotes long passages in describing the exploits of Āhavamalla. Āhavamalla's queen Vācalladevī receives full glorious treatment. He ruled over his kingdom in a right and just manner. The king enjoyed happiness and spent his leisure in various games and pastimes worthy of a great king. These are described in great details by the poet.

A man, even a king, cannot be exclusively happy and not feeling a want! The king was leading such a happy and prosperous life, yet once, while he was asleep one night, his forefathers (manes) came to him in dream and told him that although he had repaid his debts to gods and sages (devas and ṛṣis) by the study of the Vedas, fire sacrifices and donations, his debt towards them still remained unpaid, because he had no son. From that very moment the peace of mind of the king was lost and he felt miserable.

He had no pleasure. Nothing could appeal to him. He consulted his ministers. They suggested the award of gifts and the worship of Śiva as the remedy. The king felt some relief and performed his daily routine. Here we find a true picture of the daily life of a king. The description is quite detailed and elaborate.

Āhavamalla gives away sixteen great gifts (*Ṣoḍaśa mahā-dānāni*). He makes lavish offerings to Lord Śiva. Śiva is pleased. In the form of a hermit, he appears before Āhavamalla in his dream and says: "O King, enough of this penance. You will get a son soon. But you have worshipped the Lord Śiva with pride and pomp. Your son, therefore, will be full of *rajas* and *tamas*".

The king got awake. He was very unhappy. He was distressed at the prospect of getting a wicked son. However, he restrains himself and decides to go to Śrīparvata and to perform a severe penance. The ceremony of his departure is then described in great detail; the journey and the way to the mountain receive full description; the king reaches Śrīparvata; the description of the flora and fauna is attractive and lifelike. Finally the king and his companions reach Tuṅgabhadrā, flowing at the foot of Śrīparvata. Āhavamalla bathes and wor-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ships Lord Brahmeśvara. The army stays behind and the king ascends the mountain. We get a very close view of Śrīparvata and its environments. It is inhabited by many sages. Higher up on the mountain, the king sees the source of Tuṅgabhadrā. The river is described in fancy and detail. He takes bath in the Tuṅgabhadrā and has a sacred view of Lord Mallikārjuna. He pays tributes to the God and takes a vow of worship and penance.

He performs severe penance. Śiva is pleased. Āhavamalla receives a boon. Śiva tells him that he (Śiva) has requested Lord Nārāyaṇa to appear on earth in the home of Āhavamalla. In spite of having received such a divine boon, the king still awaited another son. He won't move. Śiva gets displeased. Angrily he says: " O King, excess of anything is harmful. By excessive churning, even the Milk (Ocean) gave birth to poison. You got the greatest boon. Still your craving had no end. Well, you will get a third son, but he will be the most wicked, just as your nature has been betrayed in its vicious form".

The king descends the mountain, takes along with him his army and reaches his capital, where he receives royal welcome. He resumes his normal life. The queen gets pregnant. Her vicious cravings foretell a wicked child. In a very inauspicious moment a son is born to her. The king gets distressed. The child receives unkind treatment from his father since its birth ! He is given a meaningless name.

The king continues to pine for the noble son promised by Lord Śiva. The queen gets pregnant again. She has pleasing, worthy and noble cravings, which foretell a son befitting them. In a very auspicious moment a son is born. He is Vikrama. All the desires of the king are ultimately fulfilled. The child's play revealed his best qualities. Āhavamalla performs all his ceremonies with love, care and tenderness. He grows like a moon of the bright half. He receives the sacred thread and is placed in charge of great teachers for study. He soon masters all arts and sciences and gets trained to shoulder the great responsibilities of governing the Cālukya kingdom. At the age of sixteen, the prince is designated as *yuvarāja*, the heir-apparent. The father decides to send his son for a *digvijaya* (conquering of all directions). Full preparations are made. The army is made ready for the departure.

On the pre-decided day of the march, in a very auspicious moment, the prince was given holy offerings and his forehead was adorned with curd, grass, rice etc.

Here ends the Ms.

It is interesting to compare what the court-poet Bilhaṇa wrote about his patron with what the son and successor of the king wrote about his father. Bilhaṇa is a master-artist. His poetry is superb ! He can easily be called one

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

of the greatest poets in Sanskrit. Still he is blamed by some critics that he did not conform to the historical facts.

Someśvaradeva has less respect for history than even Bilhaṇa. When Bilhaṇa composed his poem, Vikramāditya was still alive. It is true that his patron had bestowed upon him great honour and riches and he had great respect for his subject, yet he had to be restrained, because Vikramāditya was after all a living human being! On the other hand, when Someśvaradeva wrote, Vikramāditya was removed from this world and was one of the divine entities. He was above the earthly plane and had reached a status which was above mortal. So the poet could exercise more liberty and freedom.

Bllhaṇa's work is poetry; that of Someśvara is prose. Therefore, the latter is more or less descriptive and detailed. Someśvara's work shows tremendous influence of Bilhaṇa. In some passages the *Abhyudaya* is only a paraphrase of the *Carita*. No wonder Bilhaṇa influnenced Someśvara, if he could influence even the great Kāshmirian historian Kalhaṇa, the author of the *Rājataraṅgiṇī*. Maṅkha says in his Śrikaṇṭhacarita:

श्रीमानलक्कदत्तो यमनल्पं काव्यशिल्पिषु ।
स्वपरिश्रमसर्वस्वन्याससभ्यममन्यत ॥
तथोपचस्क्रिरे येन निजवाङ्मयदर्पणः ।
विल्हणप्रौढिसङ्क्रान्तौ यथायोग्यत्वमग्रहीत् ।
तत्तद्बहुकथाकेलिपरिश्रमनिरङ्कुशम् ।
तं प्रश्रयश्यत्नेन कल्याणं समभीमनत् ॥

Nevertheless, Someśvaradeva gives us a better glimpse of the history of the Cālukyas as well as the life of the hero. In some respects Someśvara surpasses even Bilhaṇa. Unfortunately his available work is incomplete. No one knows how large it was!

According to Bilhaṇa, Āhavamalla, the father of Vikramāditya, had no son. Therefore, he performed penance. Śaṅkara was pleased and gave him the boon:

इयं त्वदीया दयिता भविष्यति क्षितीन्द्र पुत्रत्रितयस्य भाजनम् ।
चुलुक्यवंशः शुचितां यदर्जितैर्यशोभिरायास्यति मौक्तिकैरिव ॥
निधिः प्रतापस्य पदं जयश्रियः कलाल्यस्ते तनयस्तु मध्यमः ।
दिलीपमान्धातृमुखादिपार्थिवप्रभामतिक्रम्य विशेषमेष्यति ॥

Bilhaṇa does not say why the second son (Vikrama) would be most virtuous and famous. Someśvaradeva, on the other hand, gives us sound reasoning. His delineation is logical and convincing. Āhavamalla had three sons—this is an historical fact. Vikrama was the worthiest and most powerful of all. He had to take arms against both of his brothers—the elder one as well as the younger

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

one. Critics of Bilhaṇa have blamed him that the poet is partial to his hero. In their opinion, Bilhaṇa's delineation of characters is not trustworthy.

Someśvaradeva follows Bilhaṇa in deifying Vikramāditya and condemning his two brothers, *nay* he even surpasses Bilhaṇa in this respect.

Following the tradition, Bilhaṇa makes Āhavamalla worship Śiva who favours him with the boon:

अलं चुलुक्यक्षितिपालमण्डन श्रमेण विश्राम्यतु कर्कशं तपः ।
किमप्यपूर्वं त्वयि पार्वतीपतिः प्रसादमारोहति भक्तवत्सलः ॥
इयं त्वदीया...            मम प्रसादात्तनयस्तु मध्यमः ।

Bilhaṇa does not give any reason. He merely states—asserts. On the other hand, Someśvaradeva takes his readers through the path of logic and reasoning. While Bilhaṇa makes Āhavamalla feel the absence of a son all of a sudden and makes him pine for him abruptly, Someśvaradeva brings the manes to Āhavamalla in his dream, who tell him that his debt to his ancestors still remains unpaid:

ततः सञ्जातनिद्रो नरपतिः...पितृभिर्वत्स, स्वाध्यायाध्वरदानादिभिस्त्वया राजन् देवर्षयः कृतार्थीकृताः । न पुनरस्मद्ऋणापहरणनिपुणः स्वस्यानुरूपः कश्चिदात्मजोऽद्यापि समुत्पादित इति स्वप्नेऽभिहितः, सहसोत्थाय तत्क्षणादेव महतीमपत्योत्पत्तिनिमित्तां चिन्तामुवाह ॥

Āhavamalla consults his ministers and as advised by them gives away great gifts (Ṣodaśa-mahā-dānāni) very lavishly. He worships profusely Lord Śiva. God Śiva is pleased. Āhavamalla is blessed with a boon:

स्वप्ने तपस्विनमाह्लोके ।...तपस्विनेत्थमभिहितः—राजन् पर्याप्तमेतेन तव तपसा । कतिपयैरेव वासरैस्तनयलाभो भविष्यति । किन्तु नितान्तभूरिद्रविणदानमदगर्वितेन परिगृहीतराजसभावान्तःकरणेन त्वया यथाराधनं भगवतो भवस्य व्यधायि तथाविध एव रजस्तमोऽधिकस्तवात्मजो भावीत्यभिधाय तिरोदधे ।

One desiring celestial nectar cannot be quieted by few drips of a rivulet. Āhavamalla journeys to Śrīparvata and performs an arduous long penance. Śiva is pleased and grants him the best boon he could have ever aspired for:

ततश्च मम (शिवस्य) प्रसादात् संपन्नमेव तव समीहितमचिरेणैव कालेन कमलावल्लभस्त्वां नन्दनभावेनानन्दयिष्यति । पालयिष्यति च सप्तपारावारमेखलापरिकलितां विश्वंभरामिति लिङ्गोदरादशरीरं वचनमुदगात् ॥

Vikrama had to take up arms against both of his brothers—elder as well the younger. This is the greatest flaw in his life. It is difficult to say who is to be blamed for these fraternal wars. Bilhaṇa has been criticised and derided upon by his critics. His defence of Vikrama is not agreeable to them. They think Bilhaṇa is not reliable when he puts all blame on Vikrama's brothers and paints Vikrama as paragon of virtues. Still Bilhaṇa is more considerate and restrained.

P. P. Ac. Gunratnasuri M.S.                Jin Gun Aaradhak Trust

On the birth of Vikrama's elder brother, Somadeva, Bilhaṇa says:

क्रमेण तस्यां कमनीयमात्मजं शुभे मुहूर्ते पुरुहूतसंनिभः ।
अवाप्य संपादितमांसलोत्सवः परामगान्निर्वृतिमीश्वरः क्षितेः ॥
स सोमवन्नेत्रचकोरपारणां चकार गोत्रस्य यदुज्ज्वलाननः ।
यथोचितं सोम इति क्षमापतेस्ततः प्रसन्नादभिधानमाप्तवान् ॥

There is no indication whatsoever that the Somadeva would turn out to be a wicked brother.

On the other hand, Someśvaradeva tells his readers that Somadeva would be a mean brother long before he was even born—रजस्तमोऽधिकस्तवात्मजो भावी !—When the queen becomes expectant, she feels cravings which foretell the viciousness of Somadeva. After enumerating many unworthy cravings, the poet says:

एवं च तामसप्रकृतिभूयिष्ठं देव्याः दोहदस्वभावमवधार्य हरवितीर्णं प्रथमं सामान्यवरमनुस्मृत्य महाराजो निरुत्साहस्तथौं ।

Bilhaṇa's Vikrama is considerate, wise and dynamic. His father wants to make him the heir-apparent, overlooking the claims of the eldest son. Both have long argument. Ultimately, Vikrama prevails upon his father. Somadeva is made the *yuvarāja*. Bilhaṇa's Vikrama says:

तातश्चिरं राज्यमलङ्करोतु ज्येष्ठो ममारोहतु यौवराज्यम् ।
सलीलमाक्रान्तदिगन्तरोहं द्वयोः पदातिव्रतमुद्वहामि ॥ ३. ३९ ।

* * *

इत्यादिभिश्चित्रतरैर्वचोभिः कृत्वा पितुः कौतुकमुत्सवं च ।
अकारयज्ज्येष्ठमुदारशीलः स यौवराज्यप्रतिपत्तिपात्रम् ॥ ३. ५५ ।

Someśvaradeva does not even care to suggest the possibility of making the eldest son *yuvarāja*. He simply states:

ततः प्राप्ते षोडशे वर्षे विबुधसंरक्षणपरस्तारकसंहरणाय प्रतारकराजकमुपसंहर्तुममरराज इव राजा कुमारकं( विक्रमं ) यौवराज्यमभ्यभिषिषेच ॥

This is fragrant violation of historical truth. Someśvara II did rule the kingdom of the Cālukyas from 1068 to 1076 A.D., between his father and his younger brother. He must have been designated *yuvarāja* at the appropriate time and age. By overlooking this fact, the poet Somadeva merely shows his disrespect for history and preference for poetic flights of imagination !

Someśvaradeva's composition is simple and attractive. His work is adorned with various figures of speech, yet they can be easily understood and enjoyed. On the whole, Someśvaradeva stands out as a remarkable poet and historiographer and his work deserved to be recovered from oblivion.

MURARI LAL NAGAR

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीः

अथ श्रीमत्त्रैलोक्यमल्ल-श्रीसोमेश्वरदेवविरचितम्

# विक्रमाङ्काभ्युदयम्

## [ मङ्गलाचरणम् ]

........ ..........................

..........................[ ल ]मत्यन्तच्छवृत्तेः ।
जातक्रोधो लयमुपनयत्यद्भुतानां निधानं
तस्मै सर्गस्थितिलय............... .......य ॥ ६ ॥

श्रीपाञ्चजन्यध्वनयः पुनन्तु
युष्मान् हरेः श्वाससमीरणोत्थाः ।
कुर्वन्ति ये त्रासमरित्रजाना-
मानन्दमुद्दाममपि द्युधाम्नाम् ॥ ७ ॥

मद्धोपैरवधार्य.......................रुरो-
लक्ष्मीकुन्तलवल्लभैस्तव नखैः प्राप्तं यशो लीलया ।
उत्कर्षस्तु ममैव देव भवता मां ज्ञेति विज्ञापयन् .
दैत्यारेरिव दानवेन्द्रदलने शङ्खः...............॥ ८ ॥

........कल्पलता तव त्रिभुवनत्राणैकबद्धस्थितेः
श्रीनारायण सा ममास्ति हृदये नो वेति साक्षी भवान् ।
सर्वान्तर्वसतिर्यदि प्रगुणिता जागर्ति........
...........धेऽभिलापमनिशं दासस्य संपूरय ॥ ९ ॥

## [ कर्णाटदेशवर्णनम् ]

अस्ति समस्तजलनिधिवलयमेखलालङ्कृतवसुन्धरायुवतिमुखमण्डलमण्डनः, सस्यानी-........तफलविलसन् क्षि........तनेत्रा........, सकिरणजाङ्गलानूपनिरुपमप्रदेशरमणीयः, चारुचामीकराकरनिकरकमनीयः; सुरु( चिर )( वै )दूर्यमरकतमाणिक्येन्द्रनीलचन्द्रकान्तादि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मणिसमुत्पादकविविधखनिनिचयविराजमानः, सुरकुञ्जराधिकसामजसमजसंपादकानेक(कुं)....वधीरितसमीरणा....णहरिणवेगोत्तरङ्गतुरङ्गमनिकुरुम्बजननभूमिभूषितः, खेटखर्वटमटम्बवाटिकाग्रामपट्टणपुरनगरोपशोभितः, (प)योष्णीगोदावरी(वञ्ज)राभीमरथीकृष्णवेन्नामलप्र(हारिणी) तुङ्गभद्रादिमहापुण्यतरङ्गिणीतरङ्गदोलैताप्रक्षालिताशेषकलिका(लमलः........शृङ्)गोल्लिखितगगनश्रीपयोधरविन्ध्यसह्यमलयवेदपर्वतश्रीशैलगन्धमादनकिष्किन्ध-ऋष्यमूकहेमकूटादिमहामहीधराधिष्ठितः, पीयूषरसानुकारित्रिकालक्षीरक्षारिकामधेनुसमानपयस्विनीसहस्राध्यासितपर्यन्तप्रदेशः, परिमितशृङ्गसुभगसमुन्नतपयोधरमण्डलारब्धपयोधारावर्षतमालवनश्यामलमहिषीवृन्दानन्दितसकलजीवलोकः, धरणिमण्डलावतीर्णबहुवर्णैकीभूताभ्रशकलायमानैरभ्रकच्छागसमूहाधिष्ठितलघुतृणकण्टकविटपार्कावृतावकाशः, वनलक्ष्मीकटाक्षविक्षेपानुकारिस्वेच्छासञ्चारिकृष्णसारकलापपवित्रीकृतोपकण्ठः, समस्तधान्यसन्दोहसंपादनसमर्थगवीप्रसूतिकारणलाङ्गलकरनिकरोल्लेखकण्डूयनकुशललोकव्याप्तः, प्रबलतरारघट्टघटीयन्त्रनिरन्तरसिच्यमानोदारकेदारविभागरेखाविसङ्कटतटाकपालीप्रवर्तितसकलजनपदमार्गः, प्रोन्नालयवनालविलोक्यमानसगर्भकणिशशुकशकुनिसन्दिग्धमुग्धपथिकजनकथनव्याकुलीक्रियमाणमञ्चिकारूढरक्षककुटुम्बिजनारब्धकोलाहलः, सततामृतरससिच्यमानसर(रु)........नाधिकधुर्यमाधुर्यसुधाकरधवलप्रोद्दण्डपुण्ड्रकेक्षुवाटावृतः, प्रविततविमुच्यमानप्रणालीप्रवाहसहस्रस्रवद्बहलशिशिरसलिलस्पर्शसंजातधरित्रीपुलकायमानकृष्णेक्षुकाण्डमण्डितप्रकृष्टप्रदेशः, चारुतरचामीकराङ्कुरनिकरायमाणाप्रमाणगन्धशालिकिंशारुकेदारराजिसत्यापितवसुमतीसुवर्णप्रसूतिः, सुबहुमृगबाधाप्रतिविधानबुद्धिप्रवर्तितप्रदीपानुकारिकुसुम्भकुसुमसंभावितधराहरितोत्तरीयप्रायश्यामायमानगोधूमक्षेत्रसूत्रितोपशोभः, काश्यपीशबरीहरितपत्राम्बरायमाणसकलजनहृदयहरणचणचणकगणवप्रपरिकरितः, स्नेहफलनिर्भरान्यनिस्नेहजनताडनोद्यतकषानुकारितैलीनतिलवल्लरीसमूहस(मुद्धा)सितः, शुकपिच्छगुच्छानुकारिस्फारतरमरकताकारपत्ररुचिरकनकसमकुसुमगोमेजिकफलमाणिक्यबीजमयसस्यलक्ष्मीक्रीडावनसमानाढकीक्षेत्रकलितरामणीयकः, प्रचुरतरानन्यसामान्यधान्यलक्ष्मीललितकराङ्गुलीसरलमुद्गकोशीसहस्रसुभगैकदेशः, सत्पुरुषायमाणपरगुह्याच्छादनक्षमानुगु(ण)गुणोत्पादनसमर्थकार्पासविटपाश्रयः, प्रोल्लसद्बहलमारुतान्दोलितनिरन्तरझणज्झणायमानशणबीजकोशीकोलाहलाकाण्डवित्रासितनिबिडगहनस्थानसङ्केतसमागताभिसारिकाजनः;

## [ वनवर्णनम् ]

दूरोदस्तैः शाखाहस्तसहस्रैर्निरन्तरप्रसारितैः सहस्रकरकरनिकरप्रवेशं निवारयद्भिरमृतकरकलाविडम्बिभिः केतकीपलाशैः प्रदीपायमानोल्लसच्चंपककलिकाभिरन्तःस्थितबहल-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मांसलच्छायान्धकारमुत्सारयद्भिः, दिवापि कामुकजनानां रजनीसमयसमुचितं रागसागरोल्लासमातन्वद्भिः, निर्मलतरनालिकेरपानीयपानपरितोषितनितान्तश्रान्तपान्थसन्ततिभिः, कल्पपादपैरिवाभिलषितफलप्रदानेन[ पान्थान् परितोषयद्भिः ]स्वकुसुमफलमूलकन्दवल्कलप्रदानादिना नैष्ठिकजनशुश्रूषां कुर्वद्भिः, शुकालापव्याजेनासत्तरुभिरिवातिदृढमूलैः शाखासहस्रविस्तारिभिः परोपकारिफलैः प्रभूतद्विजाश्रयैर्विवेकिभिर्भवद्भिरपि भवितव्यमितीव लोकानामुपदिशद्भिः, विनीतैरिव गुरुफलकालावनतमूर्धभिः, प्रोत्तुङ्गपू( गतरुसमासन्न )भुजङ्गनखक्षतपल्लवितनागवल्लीसहस्रैः, सदाशुकविवचनपाटवकरणोद्यतमरिचाङ्कुरनिकरशोभनैः, निजश्रीदर्शितनालिकेरफलपयोधरैः, वनलक्ष्मीकेशपाशायमानतापिच्छतरुगुच्छैः, प्रोन्मीलत्पनसफलनिवहैर्लतावेष्टकालिङ्गनात्पुलकमिवोद्वहद्भिः, मुचुकुन्दपाटलनागकेसरचम्पक( मल्लि )काकेतकीजातीसुरभिपरिमलवाहिभिर्गन्धवाहैः सर्वतो दिशः सुरभीकुर्वाणैर्वनैरुपशोभितः;

## [ सरोवरवर्णनम् ]

स्फटिकशिलाविशालनिर्मलजलपृष्ठप्रतिष्ठितमरकता[1]यमानकमलिनीपत्रनिविष्टसलिलकणमौक्तिकरक्तोत्पलमाणिक्यनीलोत्पलेन्द्रनीलपरिघटितविचित्रपीठोपविष्टलक्ष्मीधारिभिः, मन्दरधरणिधरक्षोभिताार्णवविमुखीभूतपुरुषोत्तमपरिकल्पितपयःसिन्धुजलतल्पशयनसङ्कल्पैः, अनल्पनैर्मल्योपलक्ष्यमाणान्तर्गतसकलपदार्थैरलक्षितसलिलतया स्थलबुद्धिमुपजनयद्भिरपि कूलस्थितार्जुनोदुम्बरजम्बूवञ्जुलप्रभृतिपादपाधोमुखप्रतिबिम्बाभिव्यज्यमानैः, पुण्यजनमानसादप्यतिस्वच्छैः, गगनस्थलैरिव प्रकटितमीनमकरकुम्भकर्कटकराशिसंचारैः, विकसितेन्दीवररुचिभिर्निरन्तरकमलावासैः शङ्खचक्रोप( शोभितै )र्नारायणवपुर्भिरिव दर्शनस्पर्शनाभ्यां जनं पुनानैः, भूभृद्भिरिव प्रकटितप्रोद्दण्डपुण्डरीकैः, आश्रमैरिव द्विजपरमहंससेवितैः, रजनिकृ( तवियोगविधुरस )हचरीभ्रमालिङ्गितरक्तकोकनदमुकुलांश्चक्रवाकसमूहान् वहद्भिः, सङ्कुचत्कमलकोटरकुटीरप्रविष्टकर्णिकाविष्टरोपविष्टमधुकरनिकर( निरन्तराभ्यस्यमान )मधुरमन्द्रध्वनिरहस्यैः, व्योमापतत्कलमरालपतत्त्रिपङ्क्तिपरंपराव्याजेन जलनिधिसमधिकसमृद्धिविलोकनकुतूहलसमीपसमागतगङ्गाप्रवा( ह )निवहापूर्यमाणैः, लीलामज्जनकुतूहलोत्तालकर्णाटरमणीसमूहवदनारविन्दनयनेन्दीवरद्विगुणीक्रियमाणकमलनीलोत्पलवनैः, तीरोपान्तसं( चरत्कु )तलकामिनीकामकार्मुकायमाणभ्रूलताकलङ्कितमुखमृगाङ्कलावण्यचन्द्रिकास्पर्शविकासितकुवलयोत्करैः, क्वचित्खेलत्कामिनीजनवहलहरिद्रां( गरा )गपिशङ्गितसुवर्णसलिलैः, क्वचिच्चरणकमलतलप्रक्षालनक्षणलग्नालक्तकरसरञ्जितैरनुरागजननैः, क्वचित्कबरीभारोदरविलुलितविविधकुसुमप्रकरकर्बुरितैः, क्वचि-

---

१ -मरक्ताय- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तीरोपान्तसंजातकरवीरव्रतप्रवृत्तनिकामकमनीयकामिनीजनैः, क्वचिच्चतुरनारीजनविरचितचतुरस्रपिष्टमययक्षमण्डलमण्डिततटैः, क्वचिद्वनवारणयूथदन्तमूलपरिवेष्टितशुण्डाप्रचण्डतुण्डाभिघातदूरोच्छलिततरङ्गितदोलायमानसलिलैः, स्वादुसलिलसंचयनिर्मितैरभिनवजलनिधिभिरिव कुम्भजातसहस्रैरप्यनभिभवनीयैः, सर्वतो रमणीयैः सरोवरैर्मण्डितः;

## [ जनवर्णनम् ]

समधिगतसकलवेदस्मृतिपुराणेतिहासपदवाक्यप्रमाणविचारैः, त्रिकालस्नानाग्निहोत्रादिनित्यनैमित्तिकानुष्ठाननिष्ठैः, प्रत्यर्तुप्रवर्तितसप्ततन्तुसन्तानहुतहुतवहोद्भूतनिःशब्दगगनोड्डीनक्रौञ्चमालानुकारिबहलधूमस्तोमसंपादितकादम्बिनीजनितपर्जन्यजन्यमानौषधीपरितोषिताशेषलोकैर्ब्राह्मणैरुपसेव्यमानः;

दानाध्ययनयजनरूपकर्मत्रयनिरतैः सकलशस्त्रविद्याकुशलैः समराङ्गणजितैः शरणागतैः प्रभुसेवापरैः क्षत्रियशतैरुपेतः;

मानत्रयनिपुणैस्त्रैवृत्त्युपजीविभिः सत्यानृतव्यापारासादितमूलवृद्धिभिर्धनाधिपसमधिकसमृद्धिभिर्वैश्यजनैरुपपन्नः;

वर्णत्रयसेवापरायणैर्भूमिकर्षणदासयोगयुद्धव्यापारविचक्षणैर्मुण्डविक्रयैकजीवि( भिः[1] ) कुटुम्बिभिः शूद्रैरध्यासितः;

अनल्पशिल्पकारकैश्चित्रकरसौचिकाङ्कशालिकरजकस्थपतिलोहकारप्रभृतिभिः पञ्चमैरविरहितः;

ग्रामसीमान्तकुटीरवसतिभि[2]रेकश्रवणाभ्यर्णनिबद्धस्फुटितवराटकैरुपरटितजर्जरितकरकृतवेणुलतिकैर्विविधचर्मवलितवटारघटननिपुणैर्नीरन्ध्रगृध्रकाककौलेयकचर्वितकीकसशकलावृतगृहाङ्गणैः, कोकिलकुलकालकलेवरकान्तिभिः, सहजमधुरस्वरैरन्त्यजातिभिरुपसेवितोपान्तः;

सर्वैरपि सुकृतार्जननिरतैः, सर्वैरपि निजनिजव्यापारासादितप्रकर्षैः, सर्वैरपि कुशाग्रीयप्रज्ञाशालिभिः, सर्वैरपि परोपकारपरैः, सर्वैरप्यसोढनास्तिकवचनैः, सर्वैरपि देवपूजापरायणैः, सर्वैरपि प्रकटितनिरन्तरसंपत्तिभिः, सर्वैरप्यनवरतताम्बूलचर्वणकृष्णीकृतदन्तपङ्क्तिभिः, सर्वैरपि बद्धदीर्घदृढासिधेनुकैः, सर्वैरपि सुप्रमाणकर्णपालीनिवेशितताडङ्कपत्रैः, सर्वैरपि सुरभिकुसुमभरितखोम्पकबन्धनविदग्धैः,

१ -जीवितैः MP.

२ -वसितिभि- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कैश्चिद् रुणुज्झुणायमानकिन्नरवादनपट्पदीगायनसहचरीद्वयतारगीतावतारणमीलितसकललोकैः, कैश्चिदेकबलीवर्दस्कन्धारोपितशकटशताकर्षणजनितबहलजनविस्मयारब्धकोलाहलैः, कैश्चिच्चतुरचञ्चुविरचनाशोभितकुन्तलैरुरसि दोलायमानशङ्खमणिग्रन्थिकाबद्धनेत्रपटच्छटाविराजितैर्व्याघ्रकृत्तिखचितविपुलदलकपृष्ठपरिवेष्टितवरपट्टिकाजानुचुम्बिलम्बमानाञ्चलचारुचीरवेषैः, कैश्चित् शिरःसमारोपितस्थालस्थापितसिन्दूररक्तकुङ्कुमार्चितमृण्मयविनायकैः, पुष्पमालावेष्टितशिरोभिः, समाकृष्टनर्तितासिधेनुभिर्विरचितकज्जलतिलकैर्हरिद्रापिञ्जरितशरीरैः, विचित्रपट्टपट्टिकादोलायमानाञ्चलनिचयपरिकरैः, मृदङ्गवाद्यानुसारेण चरणनिबद्धकिङ्किणीजालकैर्बहुभिर्नृत्यद्भिः, कैश्चित् कुसुममालावनद्धमूर्धभिर्मलयजरसविलेपनधवलैर्वाद्यमानमृदङ्गघोषैः, कराहतमुखकृतसिंहनादैर्नाडिकाकरणव्याजकृतकलकलैर्मध्यस्थापितमर्यादैः, बहलताम्बूलदानपरितोषितायातसकललोकैः, बदरकण्टकापामार्गनिम्बविरचितविचित्रवस्त्रतरङ्गविहितनीडरक्षाविधिभिः,

उदकप्रोक्षणानन्तरोद्घाटितकुलायैस्तिर्यक्पटविघटितप्रतिपक्षदृष्टिभिर्जयपराजयसूचकदृष्टिचेष्टाविलोकनचतुरैरङ्कारोपितचरणायुधचरणारातीक्ष्णीकरणोद्यतैर्योधनकुशलहस्तविमुक्तकुक्कुटैरवधूतोद्धतकेसरान् प्रसारिताकुञ्चितावनमितकन्धरान् परस्परचरणप्रहरणवञ्चनचतुरानुत्पतनपूर्वकसंघटनविपर्यासितस्थानकान् रुषा निरन्तरमिलितान् चञ्चुपुटकोटिपाटितशिरस्कानाहवार्थप्रतिव्यावर्तनप्रकटितालीकपलायनान् चञ्चुधारणपूर्वकं मूर्ध्नि कृतचरणप्रहारान् कण्ठोभयपार्श्वविनिर्गतारानुत्पाटितकृकाटिकान् बहलकीलालपरिलिप्तभूमिभागान् योधकजनविधीयमानपानीयपानसमाश्वासितानुत्तरीयाञ्चलवीज्यमानानन्तःपटधारणदत्तविश्रमान् जयपराजयैकपक्षविनिश्चयाय पुनर्विमुच्यमानानासादितैकान्तविजयान् कुक्कुटान् योधयद्भिः;

पराजितान्भीतैरुपहसद्भिरवगुण्ठितशरीरान् पलायनपरान् परान् विलोक्य विलोक्य पृष्ठमारोहद्भिरञ्जनचूर्णेन मुखानि विलिम्पद्भिः पुष्पापीडैस्ताडयद्भिः हरिद्राम्बुनिचयैः सिञ्चयद्भिः स्थाने स्थाने पुष्पवृष्टीः किरद्भिर्विजयतूर्यलयानुसारेण नृत्यद्भिः सन्तोषधावितनिजनिजसीमन्तिनीवदनकमलावलोकनाद्विहसद्भिर्जनैः परिवृतः;

## [ ललनावर्णनम् ]

क्वापि मूलावलितकुन्तलकलापविरचितधम्मिल्लमध्यनिर्गतकेशाग्रनिवेशितकुसुम्भकुसुमरचनाभिः, क्वापि चूर्णालकवलनविरचनव्यापृतकरकिसलयाभिः, क्वापि ललाटतलघटिततिर्यक्तिलकविलोकनाय करतलकलित[-ललित- ? ]दर्पणाभिः, क्वापि प्रेमकलहकोपभृकुटिबन्धवक्रतानिरुद्धप्रियतमगमनाभिः, क्वापि सरलाङ्गुलिकलितकनकशलाकाञ्जनजनितनयनापाङ्ग-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रेखाभिः, क्वापि ताम्बूलरागपुनरुच्यमानसहजदशनच्छदरुचिभिः, क्वापि नालिकेरताडङ्ककान्तिहरितायमानकपोलतलाभिः, क्वापि सन्ध्यारागविनिर्गतां कौमुदीमिव मार्जनेन दन्तपङ्क्तिचन्द्रिकां प्रकटयन्तीभिः, क्वापि प्रियतममूर्त्तिमिव सगुणां हारलतां हृदये निवेशयन्तीभिः, क्वापि सोन्नलगौरीव्रतग्रहणकुङ्कुमरञ्जितसूत्रकङ्कणं मणिबन्धे बध्नतीभिः,

क्वापि पर्यटद्विटभुजङ्गहृदयानां धम्मिल्लचम्पकमालारोपणव्याजेन समश्लक्ष्णकक्षान्तरालप्रदर्शनेनाभिलाषमुपजनयन्तीभिः, क्वापि समीपस्थितसखीपरिहासताडनकपटेन इभकुम्भसन्निभकुचतटलग्ननखाङ्कुशक्षतानि प्रकटयन्तीभिः, क्वापि निजसदनमत्तवारणशिखरावलम्बितकनकपञ्जरव्यवस्थितशुकाकर्षणमिषेण त्रिवलीतरङ्गितं क्षामं मध्यप्रदेशं दर्शयन्तीभिः, क्वापि प्रियविलोकनशिथिलनीवीबन्धबन्धनपरिवर्तिताञ्चलतया नितम्बबिम्बगौरवदर्शनपुरःसरं परतो गच्छन्तीभिः, क्वापि वल्लभानां रम्भास्तम्भाभिराममूरुप्रदेशं दर्शयितुं कलितनलिन[1]तरनिवसनाभिः, क्वापि स्तम्भमवष्टभ्य परिमितप्रसारितजङ्घाकाण्डाभिः, कामुकजनाभिमुखीकरणाय लीलावादनचरणाङ्गुलीकनकमुद्रिकाभिः,

क्वापि हरितयवनालक्षेत्रमध्यसूत्रितमधुपानक्रीडामत्ताभिर्व्यूढोरस्कललितककुदलम्बकम्बलातुङ्गशृङ्गहरिणचरणतनुपुच्छविचित्रवर्णोरःकण्ठनिबद्धकिङ्किणीघण्टिकारवरमणीयचतुरगतिबलीवर्दाकृष्यमाणपिष्टातकचर्चितशकटारूढाभिर्लीलान्दोलितकरकमलकलितयवनालयष्टिभिः, कलकण्ठं यवनालप्रशंसामधुरगीतमुद्गायन्तीभिर्निजभवनमागच्छन्तीभिः, क्वापि मेदिनीपर्वविरचितगृहाङ्गणसुधाधवलितमृत्तिकामयलघुतरगृहापणपङ्क्तिभिः, वाद्यमानतूर्यत्रयानन्दिताभिः,

सञ्चारिणीभिरिव मकरध्वजराजधानीभिः, मूर्त्तिमतीभिरिव शृङ्गाररसतरङ्गिणीभिः, चलन्तीभिरिव विकसितवदनकमलाभिः स्थलकमलिनीभिः, आलिङ्गनयोग्याभिरिव छायाङ्गनाभिः, दिवोऽवतीर्णाभिरिवाप्सरोभिः, मनोभवाधिदेवताभिरिव प्रत्यक्षलक्ष्यमाणाभिः, मेरुतटीभिरिव सुवर्णमयीभिः, मदनशक्तिभिरिव चित्तोन्मादकारिणीभिः, श्यामाभिरिव रुचिरतारकमुखीभिः, सन्ध्याभिरिव सरागाभिः, चापलताभिरिव कलितविषमशराभिः, पर्वतमालाभिरिव विपुलनितम्बाभिः, वणिङ्मूर्तिभि[2]रिव धृततुलाकोटिभिः, कादम्बिनीभिरिव प्रकाशितपयोधराभिः, चन्दनलताभिरिव भुजङ्गस्वीकृताभिः,

कर्णाटीभिरपि मध्यदेशोपशोभिताभिः, कुन्तलीभिरपि स्वीकृतकाञ्चीपदविलासाभिः, दक्षिणापथस्थिताभिरपि प्रकटितपृथुललाटदेशाभिः, तुङ्गभद्राभिरपि नर्मदाभिः, कुङ्कुकसंभूति-

१ -वलिन- MS.

२ वणिग्मूर्ति- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भिरपि प्रदर्शिताङ्गरागाभिः, मानुषीभिरपि कामरूपिणीभिः, श्रीपर्वतसमीपवर्त्तिनीभिरपि सराढाभिः कुन्तलललनाभिर्व्याप्तः;

उपाध्याय इव शृङ्गारकलानाम्, स्रष्टेव वैदग्ध्यसृष्टेः, आचार्य इव चातुर्यचर्याणाम्, गुरुरिव विलासोपदेशानाम्, उपदेष्टेव चतुरवेषाणाम्, विश्वकर्मेव चित्ररतानाम्, खलूरिकेव विषमायुधयोधस्य, उत्पत्तिभूमिरिव मदनस्य, क्रीडावनमिव रतेः, आकर इव सुखवसतेः, पश्यतोहर इवेन्द्रियाणाम्, वेलापर्वत इवानुरागसागरस्य, स्वगृहमिव धर्मस्य, शिक्षक इव सदाचारस्य, आकर्षणमन्त्र इव सकलहृदयानाम्, कार्मणमण्डलमिव लोकलोचनानाम्, विश्रम्भस्थानमिव संपदाम्, परशुरिव दारिद्र्यद्रुमाणाम्, सहाय इव कामुकानाम्, मित्रमिव सर्वप्राणिनाम्, खनिरिव पुरुषरत्नानाम्, उत्तमाङ्गमिव पृथिव्याः,

ताण्डवाडम्बरोद्यतशिखण्डिशिखण्डमण्डलैः सकलदेशाधिपत्यचिह्नायमानमायूरातपत्र-[1] निवहमुद्वहन्निव, प्रोद्दामचमरीचामरकलापैरुपवीज्यमान इव, गिरिविटङ्कसङ्कटशिलातलास्फालनजर्जरितदूरसमुच्छलच्चलितनिर्झरजलकणैरामुक्तमौक्तिकहार इव,

यत्र च मृगाणामप्यक्षरपक्षपातित्वम्, मातङ्गानामपि दानव्यसनित्वम्, उद्यानानामपि जातिशालित्वम्, गिरिनिर्झराणामपि महाप्रवाहत्वम्, पङ्कजानामपि लक्ष्मीनिवासत्वम्, मधुपानामपि सुमनःसङ्गित्वम्, निस्त्रिंशानामपि, कृष्णरुचित्वम्, विजातीनामपि द्विजत्वम्, विषाणामपि प्राणधारित्वम्, कञ्चुकिनामपि भोगित्वम्, मुक्तानामपि 'गुणसङ्गित्वम्, गुणमुक्ता[ना]मपि सुवृत्तत्वम्, मार्गणानामपि दानपरत्वम्, खलानामपि वृषप्रियत्वम्, मनुजानामपि विबुधत्वम्, जीर्णारण्यानामपि रूपशालित्वम् । छ ।

यत्र ग्रामा अपि किमपरं पट्टणाधिक्यभाजः
तान्यप्याविष्कृतवरपुरीविभ्रमाण्येव भान्ति ।
उद्भासन्ते प्रकृतिसुभगा यन्नगर्योऽपि धुर्यैः
श्रीप्राग्भारैरमरनिलयस्पर्धया वर्द्धमानाः ॥

आसन्नदेशान्तरसंनिवेश-
सीमन्तरेखापरिखायमाणैः ।
पर्यन्तपृथ्वीधरवप्रसङ्गि-
नदीशतैर्यः श्रियमाबिभर्त्ति ॥

१ -रातत्र- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यश्च

देवालयमयः क्वापि भोगिलोकमयः क्वचित् ।
लोकत्रयश्रियं धत्ते भूलोकतिलकोऽपि सन् ॥

निरन्तरं गूर्जरलाटचेदि-वङ्गाङ्गकाश्मीरकलोकयुक्तः ।
चातुर्यशिक्षार्थमिवागतैर्यो विभाति देशैः परिसेव्यमानः ॥

चकितवनकपोतीकूजितव्यञ्जितश्री-
बहुतरहरिमन्थ[1]श्यामला शैलभूमिः ।
वदति रतिरहस्यं हालिकोत्तालरामा-
रमणफलकमुद्रासंनिवेशेन यत्र ॥

अपनिद्रयामिकनिनादलीलया
कलिकालतस्करतिरस्क्रियां दधत् ।
बहुविद्यविप्रजनवेदनिस्वनः
समुदेति यत्र धृतधर्मसंपदि ॥

अप्रमुक्तवनवासकौतुकाः काममूढसकलत्रवृत्तयः ।
यत्र चित्रमविभिन्नरूपतां भोगिनोऽपि कलयन्ति योगिभिः ॥

सिद्धसिन्धुपरिरम्भवाञ्छया
प्रस्थितेव यमुना वियत्तले ।
चारुवेणिरचना नभःश्रियो
भाति यत्र मखधूमसन्ततिः ॥

सर्वतः कृतशोभो यः कर्णाटरमणीजनैः ।
प्रासाद इव शृङ्गाररसस्य बहुभूमिकः ॥

यत्राच्छलावण्यगुणोज्ज्वलानां
मनोहराणामनुकूलवृत्त्या ।
उदेति शृङ्गारतरङ्गिणीनां
श्रीः कापि कर्णाटवराङ्गनानाम् ॥

---

१ -मन्थः श्या- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्णाटकान्ताकुचदुर्गभूमिमाश्रित्य यस्मिन् पृथुतुङ्गरूपाम् ।
मन्ये पुनः पञ्चशरो हरेऽपि सज्जीकृतज्यं धनुरातनोति ॥

कामस्य कामं हरनेत्रवह्नि(ना ?) सन्तापपीडामपनेतुकामाः ।
यत्र स्त्रियो मानसहारिरूपाः भङ्गीमभङ्गां सरसां वहन्ति ॥

कामकार्मुकसमानविभ्रमभ्रूधनुर्घटितदृष्टिसायकः ।
यत्र विध्यति मनो विना व्रणं कामिनां चतुरकामिनीजनः ॥

उत्पादिताद्भुतसुखानि दृशोर्विभूत्या भ्रूतोरणानि बहुविभ्रममन्दिराणि ।
वक्त्राणि यत्र मकरध्वजरा[ज]धानीभङ्गीं कुरङ्गकदृशां मुहुरुद्वहन्ति ॥

चकास्ति भूर्दक्षिणमण्डलेन स शोभते चारुतरैर्वनान्तैः ।
वनानि राजन्ति नितम्बिनीभिर्विभान्ति कान्ताः सहजैर्विलासैः ॥

देशानन्यान्पूर्वमभ्यासहेतोः कृत्वा मन्ये लब्धशिल्पप्रकर्षः ।
पश्चाच्चक्रे यं विधिः सृष्टिसारं स व्यावर्ण्यः कैर्न कर्णाट[1]देशः ॥ छ ॥

इति महाराजाधिराजपरमेश्वरसत्याश्रयकुलतिलकश्रीमद्भूलोकमल्लश्रीसोमेश्वरदेवविरचिते महाकाव्ये विक्रमाङ्काभ्युदयाख्ये जनपदवर्णनं नाम प्रथम उल्लासः ॥

---

1 व्यावर्ण्यकैर्णकर्णाट- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# नगरीवर्णनम्

## [ कल्याणराजधानीवर्णनम् ]

तत्र चास्ति निरस्तपुरन्दरपुरविलासा, वेधसा समस्तसारपदार्थसमूहानेकीकृत्य विलोकयितुं कुतूहलवतेव सर्वाद्भुतमयी निर्मिता, विश्वकर्मणा स्वशिल्पोत्कर्षस्य प्रकटनार्थमिवामरावत्यधिका धरणितले सुघटिता, 'इयं सकलरत्नाकरभूमिः' इति नाकिलोकापहृतनिखिलरत्नसर्वस्वेन पुनरपि तत्प्राप्तिधिया जलनिधिनेवागाधपरिखामिषेण सततं निषेव्यमाणा, गम्भीरपरिखासमुपजनिताम्भोनिधिभ्रमेण प्रियतनयमैनाकदिदृक्षया हिमक्ष्माधरेणेव, समुन्नततरेण सुधाधवलेन प्राकारेण परिगता;

## [ देवायतनवर्णनम् ]

सुधाधवलानेकविशालशिलाप्राग्भारपरिघटितैः, कैलासशैलमिव समुपहसद्भिः, सुकृतिनां स्वर्गारोहणनिश्रेणिमार्गैरिव, मूर्त्तीभूतैः पुण्यराशिभिरिव, पुञ्जीकृतैः कीर्त्तिसन्तानैरिव, समीरणान्दोलनचञ्चलपताकाहस्तैरघमिव दूरमुत्सारयद्भिः, वाद्यमानपटुघण्टाटणत्कारैर्दुष्कृतमिव स्फोटयद्भिः, पुण्यलक्ष्मीपयोधरैरिव कलितकनककलशशोभैः,

देवताधिष्ठितैरपि सदानवैः, अनन्तैरप्यहीनमण्डनैः, अत्यन्तधवलैरपि बहुकालख्यातिसहैः, पाषाणमयैरपि चित्तहरैः, हराधिष्ठितैरपि परिवर्द्धितकामैः, सकृष्णैरप्यकृष्णैः, आदित्याध्यासितैरप्यर्हत्प्रतिष्ठैः, चण्डिकागृहैरपि वसुसदनैः, सविघ्नेश्वरैरप्यविघ्नकरैः, सरस्वतीनिकेतनैरपि धृतमहालक्ष्मीकैः, सुवर्णक्षयैरपि महालक्ष्मीकैः, महाकालीनिलयैरपि परिदृष्टकमलोद्भवैः, प्रवृद्धैरपि दर्शितकुमारभावैः, कलितमातृकैरप्यमातृकैः, प्रकटितभैरवमूर्त्तिभिरपि सुदर्शनैः, जिनाधिष्ठितैरपि स्थगितदिगम्बरैः, बुद्धाध्यासितैरपि स्वीकृतस्थिरभावैः,

सर्वतस्त्रिकालं तूर्यघोषानुसारेण नृत्यत्कामिनीजनकनककिङ्किणीरणितभरितदिग्भागैः, प्रेक्षणककरणार्थमागच्छन्तीभिः सुरभवनवारविलासिनीभिश्चरणाङ्गुलीमण्डनकनकमुद्रिकाटणत्काररवैः कामकार्मुकज्याटङ्कारानुकारं कुर्वाणाभिस्तीक्ष्णापाङ्गशरैस्तरुणजनमनांसि विध्यन्तीभिः, मुखनिश्वासापूर्यमाणसुस्थानसुषिरसुस्वरललिताङ्गुलिसञ्चारप्रथमोदञ्चितमध्यमादिरागानन्तरोदीरितान्यरागवंशहस्तैर्वांशिकैः, देशिमार्गकुशलैः सहजशारीरान्वितैर्मन्द्रमध्यतारत्रिस्थानशुद्धैर्मधुरकण्ठैर्हृदयङ्गमप्रयोगैः, रसिकरञ्जकशिक्षाकारभावकभेदभिन्नैर्गायद्भिर्गायकैः, गीततालानुसारेण कृतबहलदेंकारपटहवादनपटुभिः पाटहिकैः, तदनुसारेण घुमुघुमायमान-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मृदङ्गघोषमुल्लासयद्भिर्मार्दङ्गिकैः, गाढललितचरणचारीसंपादितविषमकरणाङ्गहारान् दर्शयन्तीभिः, विविधचटुलचतुरदृष्टिभावानाकिरन्तीभिः, वलनवर्तनपरिसरणापसरणाकुञ्चनप्रसारणतिर्यक्चलनपट्स्थानकुशलाभिः, सुरेखाभिर्देवसेवनार्थमागताभिरिवाप्सरोभिर्लास्यं कुर्वतीभिर्नर्त्तकीभिश्चैवं क्रियमाणसङ्गीतकैः,

कैश्चित् प्रेमोद्दामप्रणयिनीदृष्टिपातानन्दितैः, कैश्चिदुद्भटशृङ्गारभङ्गीं प्रकटयद्भिः, कैश्चिदन्योन्यसंघर्षणक्रोधबद्धभ्रूकुटिभिः, कैश्चिदविरलजनसंमर्द्देन प्रवेशमलभमानैः, कैश्चित्प्रेयसीप्रस्थापितदूतीवचनदत्तकर्णैः, कैश्चिद्भ्रूविक्षेपेण संज्ञां कुर्वद्भिः, कैश्चिद्रात्रिप्रणयकलहस्मरणबद्धभृकुटिमुखैः, कैश्चित्प्रियानर्तनावलोकनपरितोषनीराजितनिष्कपटैः[1], कैश्चित्प्रतिपुरुषदर्शनक्रोधाकृष्टासिधेनुभिरधिकारिनिवार्यमाणैः, कैश्चिद्रमणीविमोचितैरपि देवविलोकननिभेन समागतैः, कर्णाटलाटान्ध्रगूर्जरमहाराष्ट्रमालविकद्रविडप्रायैर्भुजङ्गजनैराकीर्णरङ्गाङ्गणैः,

निर्वर्तितप्रेक्षणकाभिरुद्गतस्वेदजलाभिः प्रियप्रेमसरसदृष्टिस्नपिताभिरिव, नागकन्यकाभिरिव कञ्चुकमुन्मुञ्चन्तीभिर्भुजङ्गानुसृताभिः, वामाभिरपि प्रदक्षिणोद्यताभिस्तरुणीभिरुपशोभितैर्देवायतनैः,

## [ धवलगृहवर्णनम् ]

प्रचुरैर्निरन्तररचितैरभ्रंलिहशिखरनिकरविलिखिततुहिनकरमण्डलैः, विचित्ररचनाघटितैरूर्ध्वभूमिकासमासन्नरविरथतुरगमुखफेनधवलैः, गगनाङ्गणसंचरणचतुरदिव्याङ्गनाचरणमणिनूपुरझाङ्कारप्रतिरवभरितवलभीगर्भैः, लङ्घनासमर्थव्यावर्त्तितविद्याधरविमानख्यापितौन्नत्यैः, मन्दरोद्देशैरिव सुधाधवलैः, कामुकैरिव संलग्नेष्टकान्तैः, गजवनैरिव समत्तवारणैः, कातरैरिव बहुवलभीतैः, रामवलैरिव सगवाक्षैः, मौहूर्त्तिक-पटैरिव सद्वारराशिभिः, कान्तारकन्दरैरिव सोदुम्बरैः, वनस्थलैरिव सर्वदारूपशोभितैः, वीरसमाजैरिव सर्वतोरणशालिभिः, पुरोपान्तैरिव प्रकटितपृथुकवाटैः, ऐन्द्रजालिकैरिव स्वीकृतजालमार्गैः, धवलगृहैरुद्भासमाना, स्वप्नेऽप्यनवलोकिततृणगृहा;

## [ विपणिसदनवर्णनम् ]

उभयतोऽप्येकपरिपाटिपरिघटितद्विभूमिकसौधपङ्क्तिभिः, प्रतिवणिग्गृहलभ्यमानत्रैलोक्यदुर्लभादुर्लभपदार्थसार्थैः, प्रत्यक्षनिधिप्रतिनिधिभिः, जलधरदिवसैरिव बहुघनसारैः, नीचैरिव श्रीखण्डोल्लसितैः, नास्तिकैरिव सागुरुवासनैः, गङ्गाप्रवाहैरिव बहुमार्गैः, नन्दनप्रदेशैरिव सहरिचन्दनैः, छन्दोभिरिव गीतशास्त्रैरिव सार्थैरिव वनैरिव दृष्टबहु-

1 -निःकपटैः MS

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जातिफलैः, रसायनसिद्धैरिव मुक्तामयैः, ग्रहमण्डलैरिव सनीलैः, सरोभिरिव सपद्मरागैः, मरुमण्डलैरिव विद्रुमश्रीधरैः, अकालघनैरिव सवज्रैः, अतिबहलविमलमुक्ताफलकान्तिसन्तानैर्विहसन्तीमिव लक्ष्मीमुपदर्शयद्भिः, स्थूलेन्द्रनीलमणिकिरणान्धकाररुचिरपद्मरागोद्द्योतबालातपसमसमयनिरन्तरप्रदर्श्यमानरजनिवासरैः,

अतिसूक्ष्मतया नयनागोचरैः स्पर्शानुमेयैरम्बरैः, लघुतुलनैरपि गुरुमूल्यैः, सितैरप्यनुरागकरैः, प्रच्छादनक्षमैरपि प्रकटितगुह्यैः, गुणवद्भिरपि सबन्धैः[1], अगणितैरपि दशावच्छिन्नैः, कृष्णैरप्यभिरामैः, विस्तृतैरपि मुद्रितैः, विश्वासनिक्षिप्तैः स्वच्छसत्पुरुष[2]हृदयैरिव सितैः, लक्ष्मीकुचकुङ्कुमलिप्तैरिव पिशङ्गैः, ग्राहकरागिजनसानुरागहृदयप्रवेशरञ्जितैरिव लोहितैः, कुट्टिमावनद्धचन्द्रकान्तप्रभाभीतान्धकारावयवैरिव कृष्णैः, राज्यलक्ष्मीसन्निवेशैरिव करितुरगपदातिरथस्वस्तिकपातचिह्नितैः, पुस्तकैरिव साक्षरैः, कार्पासत्रासरपाटसूत्रराङ्कवादिभिरन्यैश्च बहुविधैर्वाशोवासवभवनैरिव विपणिसदनैरलङ्कृता;

## [ धामवर्णनम् ]

एकत्र पुरलक्ष्मीकेलिशैलायमानविचित्रधान्यराशिपरिपूर्यमाणप्राङ्गणैः, अन्यत्र समुद्रप्रस्थापितप्राभृतायमानलवणपुञ्जविराजितैः, अपरत्र सकलजनपदजनमुखरागजननशशिखण्डपाण्डुरनाग(वल्लीद)लक्षीरिणीपूगीफलसहकारनागरङ्गनालिकेरमातुलिङ्गकदलीजम्बीरदाडिमद्राक्षात्रपुसपनसफलादिशोभितताम्बूलिक( प्रदेशैः, इ )तरत्र सुगन्धामलकसान्द्रपुलिङ्गमृगनाभिकर्दमचन्दनद्रवगन्धतैलपुष्पनिर्यासकर्पूरकाकतुण्डदेवदारुशर्करामधुसिल्हा( रस )....वर्त्तिमुखवासपटवासपानीयवासाद्यवन्ध्ये[ ! ]सौगन्धिकव्यवहारैः, एकतः कमलकुवलयकुन्दमल्लिकापाटलचम्पकमाल....नवदननयनदशनविहसनवसनललितदोर्लतानखविलासमालिनीजनमनोहरीकृतैः,

## [ वेश्यावर्णनम् ]

अन्यतो विहसितरतिवि( लास )....कलाभिः, सकलजनहृदयाकर्षणमन्त्राधिदेवताभिः, युवजननयनहरिणवागुराभिः, निखिलजननयनहृदयविषयान्तरगमनमदनराजाज्ञाभिः, प्रत्यक्षचित्ततस्करीभिः, मनोभवपथपथिकजनसर्वस्वापहरणपारिपन्थिकाभिः, मदनकृतान्तपाशलतिकाभिः,

अक्षीणचन्द्रमूर्तिभिरिव सकलकलाधराभिः, निजमध्यप्रदेशमिव कामिजनं क्षीणं कुर्वाणाभिः, सकलचित्तवृत्तिभिरिव मूर्त्तिमतीभिः, रत्नाकरवेलाभिरिव लावण्यरसान्विताभिः,

1 सबद्धैः MS. 2 -सत्पुर्ष-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वसन्तश्रीभिरिव कलकण्ठनिस्वनाभिः, पटुचटुलेन्द्रियहयवाहककामाश्ववारकषाभिरिव ललिततनुतराङ्गयष्टिभिः, भुजङ्गवर्गगर्वगरलहरणागदधूपशिखाभिरिव श्यामाभिः, मकरध्वजचापलताभिरिव गुणवतीभिः, कलहंसीभिरिव प्रतिमानसं स्थिताभिः,

कौटिल्यं भ्रूयुगले हृदये च, अलीकसङ्गं वदने वचने च, रागमधरे मनसि च, काठिन्यं कुचयुगे सुरते च, चञ्चलतां लोचनयोः स्नेहे च, जडतां नितम्बभागे गतिविभ्रमे च, सरलतां बाह्वोः प्रियानुनये च, हरिद्रारागं वपुषि चेतसि च, नखपङ्क्तिः करयोः स्तनतटे च, कार्ष्ण्यं भ्रुवोः कुन्तलेषु च दर्शयन्तीभिः,

ऊरुभ्यां जितरम्भाभिः, सुरुचिरकान्त्याभिभूतसौदाम्नीभिः, कवरीभरेणाधरीकृतसुकेशीभिः, स्निग्धतया विडम्बितघृताचीभिः, मधुरकल[ ला ]पैस्तिरस्कृतमञ्जुघोषाभिः, सौन्दर्येणोपहसितसुन्दरीभिः, बहुकुमारसंसर्गेण परिभूतदेवसेनाभिः, वदनकमलप्रभाभिर्विजितसुमुखीभिरित्यप्सरोधिकाभिः,

पूर्वपरिचितं विदन्तीभिरभिनवम्, अभिनवं जानन्तीभिश्चिरकालसङ्गतम्, सङ्गतं विदधतीभिरनुचितम्, अनुचितं कुर्वतीभिर्धनार्थम्, धनार्थमर्पयन्तीभिरात्मानम्, आत्मानमलङ्कुर्वतीभिरहरहः, रहःस्थानमाह्वयन्तीभिर्वल्लभम्, वल्लभाधिकं मन्यमानाभिर्दूतजनम्; जनपतिमनिच्छन्तीभिरदातारम्, दातारं संमानयन्तीभिर्दासम्, दासत्वमङ्गीकुर्वतीभिः प्रियं प्रति, प्रतिपन्नत्वं प्रकाशयन्तीभिः प्रतिपुरुषम्, रुषं दर्शयन्तीभिः कृतकाम्, कृतकालापेन रचयन्तीभिः कलहम्, कलहमिवाभिनयन्तीभिः सुरतम्,

अपि च—उभयथा मायानिवासभूताभिरुभयथा प्रियप्रतिवचनचतुराभिरुभयथा रागकरणकुशलाभिरुभयथा ललितबालाभिरुभयथा कुसुमेषुरसिकाभिरुभयथा हृदयहारिणीभिरुभयथा समत्तवारणगृहाभिरुभयथा कुन्तलालङ्कृतिभिरुभयथा जातरूपप्रियाभिरुभयथा कुपतिरतोत्सवाभिः,

अपि च—उत्तमनायिकाभिरपि कलिताधररागाभिः, हरिणीभिरपि शशरताभिः, वडवाभिरपि वृषप्रियाभिः, हस्तिनीभिरप्यश्वव्यसनिनीभिः, मानुषीभिरप्यङ्गीकृतसुरताभिः, सालङ्काराभिरप्यनुपमाभिः, सलक्षणाभिरप्यनाकलितप्रथममध्यमोत्तमपुरुषाभिः, काममयीभिरपि वशीकृतेश्वराभिः, प्रहर्षिणीभिरपि तनुमध्याभिः, वसुरताभिरपि नवसुरताभिः, ललिताङ्गीभिरपि कलितानङ्गस्थितिभिः, बालाभिरपि बहुकलावृद्धाभिः, कातराभिरपि रतिशूराभिः, निम्नगाभिरप्यजडाभिः, बहुपुरुष[1]वतीभिरप्यद्वितीयाभिः, सर्वेदानवरताभिरपि स्वीकृतसुराभिः,

---

1 -पुर्ष- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समविषमावटस्थलीभिरिव जनस्खलनहेतुभूताभिः, विषवल्लीभिरिव जनितमोहाभिः, कल्लोलिनीभिरिव स्वरसे निमज्जयन्तीभिः, नीचसङ्गतिभिरिव व्यसने निपातयन्तीभिः, मृगतृष्णिकाभिरिव विभ्रममुत्पादयन्तीभिः, तृतीयपुरुषार्थस्यैकराज्यमुपजनयन्तीभिः, रसान्तरतिरस्कारेण शृङ्गाररसस्याभिषेकमाचरन्तीभिः, ईर्ष्यामयमिव जीवलोकं सृजन्तीभिः, रणरणकमयीमिव निखिलजनान्तःकरणवृत्तिं कुर्वाणाभिः, सकलतरुणजनहृदयसर्वस्वावासमञ्जूषिकाभिः, भर्गभालोग्रनयनानलदग्धमकरध्वजसञ्जीवनामृतरसघटीभिरिव वेश्याभिः शोभितैः,

## [ पाचकवर्णनम् ]

अपरत्र–नलभीमगौरीमतत्रयानुगुणपाकनिर्माणनिपुणैः, लेह्यचोष्यपेयखाद्यभोज्यरूपपञ्चविधाभ्यवहारविरचनचतुरैः, क्षीरशाकमोदकापूपतिलशष्कुलीशर्कराघृतविलिप्तमण्डकघृतपूरेड्डुरिकाघोसकघारिकापूरिकाचणकवटकविविधान्नकरम्बककृसरपायसाम्रखलकनिष्पादन[1]प्रौढैः, दाडिमसारामलकसाराम्लीकफलबदरचूर्णाम्रपट्टचणकाम्ब्लनिम्बूकबीजपूरार्द्रकरसलशुनसंस्कृतजीरकमरिचनागरहिङ्गुधान्यकहरिद्रासंभारसंयुक्तवराहहरिणरोहितसारङ्गकुरङ्गशम्बरशिखरिशशसल्यसेधागोधारल्लकाछागलावकतित्तिरमयूरवर्तीरक्रौञ्चारण्यकुक्कुटचटकादिविविधविहगकर्कटकमठपाठीनरोहितसिंह[2]तुण्डराजीवादिचर्मशुक्तिमत्स्यघींचकमांसपाक[3]कुशलैः, विविधफलपत्रशाकपाकप्रवीणैः, पानकव्यञ्जनमज्जिकाशिखरिणीमस्तुतक्रकाञ्जिकचिञ्चु-एलाकर्पूरागुरुनखसहकारधूपसुगन्धपुष्पवासदानदक्षैः, विविधदधिदुग्धघृतविधायिभिः, कन्दमूलफलपुष्पकाण्डपत्रादितैलराजिकाचूर्णमिलितलवणसन्धानविदग्धैः पाचकैरधिष्ठितैर्धामभिः स्पृहणीयैर्विपणिमार्गैः पुरस्कृता;

अमरावतीव विबुधाधिष्ठिता, भोगवतीव भोगिभिरावृता, अलकेव पुण्यजनाश्रिता, हेमकूटनगरीव गन्धर्वराजिता, लङ्केव दशमुखख्याता, अयोध्येव रामोपशोभिता, द्वारवतीव पुरुषोत्तमरक्षिता;

अन्यच्च–वसन्तश्रीरिवाशोकविकासा, ग्रीष्मलक्ष्मीरिव जडरहिता, वर्षासंपदिव सघनोदया, शरदिव राजहंसावतंसा, हेमन्तसमृद्धिरिव परमहिमोपशोभिता, शिशिरशोभेव समाकन्दोल्लासा, विष्णुमूर्त्तिरिव वनमालान्विता, हरमूर्त्तिरिव भूतिमती, ब्रह्ममूर्त्तिरिव कमलवासा, आदित्यमूर्त्तिरिव सपद्मोल्लासा, चन्द्रमूर्त्तिरिवाह्लादकारिणी;

क्वचित् प्रमदवनैर्हरितायमाना, क्वचिदुत्तुङ्गसौधधामभिर्धवलायमाना, क्वचित्सौवर्णकलशपरंपराभिः पीतायमाना, क्वचित्पुष्करफूत्कारदूरोच्छलितकरिकुंभसिन्दूररेणुभिर्लोहितायमाना, क्वचिन्नित्यप्रवृत्ताग्निहोत्रहुताशनधूमस्तोमैः कृष्णायमाना;

---

1 -निष्पाजन- MS. 2 -सिंघ- MS. 3 -मांस्पाक- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्विधापि बहुवर्णशालिनी, द्विधापि वृषधारिणी, द्विधापि पुन्नागशोभिता, द्विधापि सुवर्णमयी, द्विधापि सुधामाश्रिता, द्विधापि प्राकाराभिरामा, द्विधापि कुल्योपचिता, द्विधापि नानारामालङ्कृता;

ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-दण्डनायक-माण्डलिक-सामन्त-खण्डपाल-मन्त्रि-महत्तर-मौल-भृत्य-महामात्य-भागवत-पाशुपत-आर्हत-सौगत-पण्डित-विनीत-दूत-क्षात-शान्त-तार्किक-शाब्दिक-तान्त्रिक-पौराणिक-कवि-सुभट-भट-नट-चठर-विट-वटु-पाटहिक-गायक-वादक-वांशिक-वैणिक-पाणविक-मौरजिक-कांस्य[1]तालिक-शाङ्खिक-जार्जरिक-त्रैवलिक-काहलिक-ढांवसिक-वैतालिक-कथक-चित्रकर-विविधशिल्पकरवैकटिक-रत्नपरीक्षक-लघुदीर्घक्षुरिकाकार-खाड्गिक-कुन्तकर-धनुर्धर-सेल्लतोमरचक्रभिण्डिपाला[2]द्यनेकशस्त्रधर-विविधगणक-दैवज्ञ-स्वरोदयज्ञ-भूबलज्ञ-निमित्तज्ञ-शकुनज्ञ-विविधवैद्य-कायस्थ-लेखक-हस्तिपक-अश्ववारतौरङ्गिक-हस्तिव्यावहारिक-शौल्किक-धमनिक-दण्डपाशिक-कलाकुशल-सामुद्रिक-कितव-महानसिक-कञ्चुकि-गारुडिक-मान्त्रिक-विलासिनी-लासिका-गायिकाजनपरिवृता;

अन्यैश्च सिंहलकलहकटाहबर्बरमखचोहाररेवतीद्वीपोद्भवैः, गूर्जरलाटमालविकचेदि-मध्यदेशटक्कतुरुष्ककाश्मीरकगौडकलिङ्गान्ध्रद्रविडपाण्ड्यकेरलमलयसप्तकोङ्कणप्रभृतिनानादेश-समागतैराकीर्णा, किं बहुना, त्रिलोकीव सर्वाश्चर्यशालिनी, कल्याणाभिधाना राजधानी ॥ छ ॥

कटाक्षपातैर्हरिणेक्षणानां वशीकृते यत्र जगत्त्रयेऽपि ।
यशः परं भूरि मनोभवस्य शिलीमुखैः पुष्पमयैरलम्भि ॥

वहति सहिरण्यगर्भा सुमनःप्रचुराच्युतेश्वरप्रणया ।
विपणिसरणिरपि यस्याः स्वैरं स्वर्गप्रतिस्पर्द्धाम् ॥

या बिभर्ति श्रियं काञ्चिदाश्लिष्टाकाशमण्डपैः ।
तुङ्गैर्धवलितस्तम्भसन्निभैर्देवमन्दिरैः ॥

यत्तुङ्गहर्म्याङ्गणसङ्गतानां विलोक्य रूपं पुरकामिनीनाम् ।
विमानमारुह्य दिवि प्रयान्त्यो विद्याधराणां वनितास्त्रपन्ते ॥

निबद्धकांस्योज्ज्वलभाजनाभिः प्रत्यापणं तोरणमालिकाभिः ।
स्वसान्द्रसौन्दर्यविलो(कनाय) विभाति या स्वीकृतदर्पणेव ॥

---

1 -कांश- MS. 2 -वाला- MS.

P. P. Ac. Gunratnasuri M.S.		Jin Gun Aaradhak Trust

यत्राङ्गनानां वलभीस्थितानामुत्तुङ्गसौधाग्रतरङ्गभाजि ।
सरोवराभे गगने विभान्ति नेत्राणि नीलोत्पलसन्निभानि ॥

य( त्तुङ्ग )वलभीधूप-धूमव्याकुलचक्षुषाम् ।
दोषाय निर्निमेषत्वं जायते सुरयोषिताम् ॥

निशावधूराजतखर्पराभः क्षपासु यस्यां क्षणदाभुजङ्गः ।
सुतुङ्गसौध( स्थितदी )पसङ्गाल्लक्ष्मप्रभां कज्जलवद्बिभर्ति ॥

यस्यां कुरङ्गायतलोचनानामालोक्य रूपातिशयं विचित्रम् ।
आत्मानमप्यात्मशरैरमोघैर्विध्यन्नसौ भ्राम्यति पुष्पचापः ॥

सुरतश्रान्तकान्तानां यत्र स्वेदसुधाकणैः ।
उग्रभालाग्निदग्धोऽपि पुनर्जीवति मन्मथः ॥

यत्राट्यशालापटहैः क्वणद्भिरुल्लासितामन्दमृदङ्गवाद्यैः ।
प्रकाश्यते स्वैरविहारशील-कन्दर्पचण्डद्विपडिण्डिमत्वम् ॥

यस्यां समुन्नतसदःशिखराधिरूढः
प्रारब्धताण्डवविलासभरः शिखण्डी ।
आसादयत्यतिसमीपत एव वारि-
बिन्दून्पयोदपटलाद्गगनाङ्गणस्थात् ॥

यत्र चित्रभवनेषु यथावत्सङ्गतानि मिथुनान्यवलोक्य ।
शिक्ष्यते प्रतिकलं रतितन्त्रे कौशलं किमपि मुग्धवधूभिः ॥

सुभगैर्गृहमत्तवारणौघैर्वसुभिर्देवकुलैरतीतसङ्ख्यैः ।
नगरीममरावतीं सुराणामपि निर्जित्य सदैव वर्तते या ॥

नामैक्ययोगादिव सेव्यते या सदैव कल्याणपरंपराभिः ।
तत्रास्ति कल्याणमिति प्रसिद्धा सा कुन्तलक्ष्मापतिराजधानी ॥

भूषा भुवः कुन्तलदेश एष तस्यापि शोभातिलकः पुरीयम् ।
पीयूषधारेव चिरं न केषामेषा दृशोः संमदमातनोति ॥ छ ॥

इति महाराजाधिराजपरमेश्वरसत्याश्रयकुलतिलकश्रीमद्भूलोकमल्लश्रीसोमेश्वरदेवविरचिते विक्रमाङ्काभ्युदयाख्ये महाकाव्ये नगरीवर्णनं नाम द्वितीय उल्लासः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# [ राजवंशवर्णनम् ]

तत्र चाभूदभूतपूर्वमहिमा हिमकिरणधवलकीर्तिः कीर्त्तनीयनिर्मलगुणग्रामः सङ्ग्रामेष्वप्रतिमल्लस्त्रैलोक्यमल्ल इति राजा, यः पुरीमेनां निखिलाद्भुतमयीं निर्ममे। यस्य च शाखासहस्रसमासादितप्रसरो दृढमूलालङ्कृतेलातलः सद्वृत्तराजमुक्तामणिप्रसवहेतुर्वंशः, यत्र संजाता बुधपुरूरवःप्रभृतयः क्षेमकपर्यन्ताः क्षत्रियाः पुराणप्रसिद्धा एव। तदनन्तरमेकोनषष्टिः क्षितिभुजः सूर्यवंशोद्भवान् क्षत्रियानायोधने विजित्यायोध्यायां राज्यं चक्रिरे।

तदनन्तरं सत्याश्रयो नाम राजा बभूवाद्यापि यन्नाम्ना सत्याश्रयकुलतिलक इति तद्वंशजानां भूभुजां राजावली पठ्यते। यो विष्णुप्रसादात् शङ्खचक्रवराहलाञ्छनानि विष्णुवर्द्धन इति द्वितीयं नाम च लेभे; यश्च गङ्गाधरप्रसादात् गङ्गायमुनाभिधानं धवलश्यामलं ध्वजयुगलमाससाद; यश्च कुमारप्रसादात् मयूरपिच्छालङ्कृतकुन्तच्छत्रचामरकूर्चवट्टुकक्रूर्चिकाकरकचिह्नान्यवाप; यश्च कौशिकीभगवतीप्रसादात् श्वेतातपत्रविचित्रास्त्रविज्ञानानि च प्राप; यस्य चाग्रे सप्तमातरः संयुगेषु पुरतो विजयाय धावन्ति; यश्च चालुक्यपर्वते शर्ववरप्रसादात् चालुक्य इति व्यपदेशमुवाह।

तस्य सुतो विश्वम्भराकण्टकराष्ट्रकूटमदकरटिविघटनसिंहो जयसिंहदेवो मदोद्धुरगन्धसिन्धुराष्टशतीं, चतुरग[ति]तुरगायुतद्वयं, वीरभटानां लक्षं, क्षत्रियाणां पञ्चशतीं हत्वा इन्द्रभूपतिं रणाजिरे जघान। तत्र च प्राप्तविजयपरंपरो विजयापुरमिति पुरं चकार।

तस्य सुतः सततमविमुक्तरणरागो रणरागदेव इत्यासीत्।

तस्य तनुजो वीरलक्ष्मीसंपर्ककलितपुलकः पुलकेशिदेवो बभूव, यस्याश्वमेधाध्वरे कैरप्यनिरुद्धश्चतुःसमुद्रमुद्रितां भूतधात्रीं बभ्राम तुरङ्गमः; यश्च ऋत्विग्भ्यस्त्रयोदशसहस्राणि ग्रामाणां दक्षिणामयात्; यश्च प्रतिसङ्क्रान्ति षोडशभिर्महादानैर्विप्रसार्थं कृतार्थमकृत।

तस्यात्मजस्त्रैलोक्यरङ्गाङ्गणनर्तितकीर्तिः कीर्तिवर्मदेवोऽभवत्।

तस्यानुजो विविधरत्नपरितोषितविबुधवर्गः शरणागतक्षोणीभृत्परिरक्षणक्षमः प्रोद्दामवाहिनीसहस्रपरिपूरितसङ्गराणर्वो मङ्गलार्णवश्चालुक्यसिंहासनमध्युवास, यश्चाष्टादशद्वीपभूषणां विश्वंभरां बुभुजे; यश्चाग्रजात्मजं सत्याश्रयदेवं राज्येऽभिषिच्य तपोवनं प्रतस्थे; यश्च भगवत्याः प्रसादादासादितयोगपादुकायुगलः कालितखड्गसिद्धिर्वाणवर्णितोत्कर्षं श्रीहर्षं सङ्गरे विजिग्ये।

तस्य पुत्रो विचित्रनिबिडसमरक्रीडाविडम्बितारातिसंपदेड्वरिर्बभूव।

तस्य सुतः प्रबलतरप्रतापभरानुकृतादित्यलक्ष्मीरादित्यवर्मदेवोऽभूत्।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्यापत्यं प्रतिनरपतिरमणीकरुणाक्रन्दख्यापितपराक्रमो विक्रमादित्यो राज्यलक्ष्मीं भेजे ।

तस्य नन्दनः प्रचण्डदोर्दण्डविजितविविधयुद्धो युद्धमल्लदेवः क्षोणीपतित्वमभजत ।

तस्यात्मभवः प्रकामविषमसङ्ग्रामलब्धविजयो विजयादित्यदेवश्चक्रवर्ती बभूव; यश्चैकाकी निक्षिप्यामात्येषु राज्यभारमेकाङ्गवीरो निगूहितनिजाकारः सिंहलद्वीपे काञ्चीपुरे वेङ्ग्यां गङ्गपाटिकायां च दर्पात्प्रकटितासिधेनुविद्यो निरवद्यपराक्रमनिहतप्रत्यङ्ककारो निरवद्यं नाम लेभे ।

तस्य सूनुः प्रोच्चण्डकोदण्डविद्याखण्डितवक्ररिपुचक्रः कोक्कुलिविक्रमादित्यः साम्राज्यमसेवत ।

स तस्य तनयो विषयेष्वत्यन्तमासक्तः कीर्तिवर्मदेवोऽभवत् ।

तत्पितृव्यो भीमपराक्रम आसीत् ।

तत्पुत्रः कीर्तिवर्मदेवो बभूव ।

तत्तनयस्तैलपदेवोऽभवत् ।

ततः पुत्रो मूर्तिविक्रमादित्यदेवोऽजनि ।

तस्यात्मजो भीमदेवो बभूव ।

तस्यापत्यमैयणदेवो जातः ।

तस्य सूनुर्वसुदेव इव पुरुषोत्तमजननयोग्यो विक्रमादित्यदेवः प्रादुरासीत् । तस्य च चेदिमण्डलमण्डनपारियात्रधात्रीपतिलक्ष्मणराजपुत्री तुहिनकिरणस्येव रोहिणी बोन्थादेवी महिषी बभूव ।

## [ तैलपनृपतिजन्मवर्णनम् ]

अत्रान्तरे सकललोकपालैर्भगवत्या च भुवा सर्वैश्च दिक्पतिभिस्त्रिदशैश्च संभूय मन्दरमथनकृतार्थीकृतसकलसुरसार्थे चन्द्रप्रदानविभूषितमहेश्वरशिरसि शृङ्गारसञ्जीवनौषधायमानजनिताप्सरःसहस्रे निर्भरामृतरसप्रदानामरीकृतगीर्वाणगणे लोलकल्लोलमालाव्याप्तदिक्चक्रवाले क्षीरसमुद्रमध्ये कल्पितभोगीन्द्रतल्पयोगनिद्रः सविनयमुपसृत्य क्षीतितलविनिहितमौलिबद्धाञ्जलिपुटं नमस्कृत्य भगवान् लोकत्रयरक्षादक्षः पुण्डरीकाक्षः केशवदेवो विज्ञप्तः ' देव सकलजगच्छरण्य, दनुजकुलदलनवरेण्य, प्रदर्शिताद्भुतत्रिविक्रम, निरुपमागणितविक्रम, जगन्नाथ, जनार्दन, कंसासुरविमर्दन, गोवर्द्धनोद्धरणविस्मापितनन्द, जनितसकलभुवनानन्द,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भास्वत्कौस्तुभकान्तिविकासितलक्ष्मीमुखारविन्द, संसारपटनिर्माणकुविन्द प्रसीद भगवन् । तव प्रसादात्कृतत्रेताद्वापरेषु युगेषु सुखिनो वयमभूम । मत्स्यकच्छपवराहनरसिंहवामनरामत्रयाद्यवतारैस्त्वया परिरक्षिताः । इदानीं तु कलौ स्वामिनैव रक्षणीयाः । संप्रति पुनः श्वशुरगृहनिवासबद्धकौतुके लक्ष्मीविलासरसिके भगवति भवत्पूर्वैनिहतैरेव मनुष्यरूपधरैर्निशाचैररुपद्रूयमाणाः प्रभोश्चरणशरणतामागताः ।' इति निवेद्य 'देव एव जानातीत्यभिधाय' तूष्णीं बभूवुः ।

अथ भगवान् योगेश्वरो मुहूर्तमिव ध्यात्वा विदितमर्त्यलोकवृत्तान्तः प्रसादकान्तया दृष्ट्या तानवलोक्य सानुग्रहमेवमादिशत्—'जानामि दुष्टानां चरित्रं राष्ट्रकूटराक्षसानाम् । बहुकण्टका भूमिर्दुःसञ्चरा वर्तते । यजनयाजनादिकं च न प्रवर्तते । तदिदानीहं युष्मान् रक्षितुं चालुक्यकुलोद्भवस्योभयपक्षविशुद्धस्याच्युतक्षत्रियचरित्रस्यानाकलितकलिकालकलुषस्य लोकोत्तरसत्याश्रयस्य विक्रमोपार्जितवित्तस्य विक्रमादित्यस्य भार्याया महासत्या बोन्थादेव्या गर्भे जन्म करिष्यामि । यूयं विगतशङ्काः सुस्थीभूय व्रजत' इति । ते च लब्धवराः स्वस्थानं ययुः ।

अथ कदाचित्तौ दंपती यामिन्यास्तुरीययामान्तःस्वप्ने भगवन्तं विश्वंभरं चतुर्भुजं शङ्खचक्रगदाधरमङ्काधिरूढमपश्यताम् ।

ततः प्रभाते समुत्थाय कौतुकोत्तरलमानसावाज्यावेक्षणक्षणसमागतं पुरोहितं समाहूय स्वप्नफलं पप्रच्छतुः । ततः पुरोहितोऽपि हर्षोत्कर्षरोमाञ्चकञ्चुकितगात्रः सप्रमोदमिदमवादीत् —'सुफलो भवत्वयं स्वप्नः । युवयोः स एव भगवान् जगत्त्रयनाथः श्रियः पतिः पुत्रो भविष्यति । प्रजानां स्वास्थ्यं भविष्यति । धर्मो वर्धिष्यते । अधो नङ्क्ष्यति । अस्मन्मनोरथतरवोऽपि फलिष्यन्ति । पुनरयं स्वप्नः क्वापि कस्यापि पुरतो न प्रकाश्यः' इत्यभिधाय लब्धप्रसाददानो गृहमयासीत् ।

ततः कतिपयेषु दिवसेषु गतेषु देवी गर्भमधारयत् । ततस्तयोः सुतः साक्षाच्छङ्खचक्रपद्मलाञ्छितकरचरणकमलो महाराजाधिराजः परमेश्वरः परमभट्टारकः सत्याश्रयकुलतिलकश्चालुक्यवंशचूडामणिः श्रीतैलपदेवो बभूव, यस्त्रैलोक्यमल्ल आहवमल्लो रट्टघरट्टस्तलवर्गतलप्रहारी दुष्टाङ्गरक्षकराक्षसो मुञ्जकरटिघटाविघटनपञ्चाननः पारियात्रधात्रीखनित्रं कक्करणखम्भकुम्भिकण्ठीरवो झंझव( ज )लाघवदर्पदलनस्तीर्णप्रतिज्ञार्णवः पञ्चलमदेभपञ्चाननो डाहालकोलाहलो गौडपन्नगगरुडो मगधविषयधूमकेतुः खाण्डवदहनार्जुनः कालिङ्गालकालपाशः कोङ्कणभयङ्करः चोडकुलकवलनकालः सिंहलमरालमेघो गूर्जरभयज्वरः सप्तमालवसप्तार्चिः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चञ्चग्रहोच्चाटनसिद्धमन्त्र उत्पलप्रलयान्तको विषमाष्टोत्तरशतसमरप्राप्तविजयाभरणः क्रीडा-गृहीताष्टाशीतिदुर्ग इति बिरुदपरम्परां लेभे। अन्यच्च षट्सप्तत्यधिकानि चतुर्दशशतानि मदकरटिनामपहृत्य संख्येष्वसंख्यातानि पदातितुरगबलानि विनिहत्य मुञ्जराजशिरःकमलेन भगवतीं चण्डिकामानर्च।

तस्य च त्रयः पुत्राः पवित्रचारित्रगुणाः सत्याश्रयदेवदशवर्मदेवपुलकेशिदेवनामान आसन्। तेषु सत्याश्रयदेवो वीरसिंहासनमलञ्चकार। स च दशवर्मदेवतनयपञ्चकमध्ये विक्रमादित्यदेवाय राज्यं ददौ।

तदनन्तरमैयणदेवस्तद्भ्राता कियन्त्यपि दिनानि भूमेः प्रभुरभूत्।

तदनन्तरं तदनुजो जयसिंहदेवः पृथ्वीपतिरभवत्।

## [ आहवमल्लदेववर्णनम् ]

तस्य सुतः प्रागुपवर्णितकल्याणपुरपरमेश्वरः परपुरत्रिपुरमहेश्वरः परममाहेश्वरः षोडशराजसच्चरिताभ्यधिकचरित्रः पवित्रीकृतचालुक्यगोत्रः प्रबलप्रतापदहनदग्धारातिवसुन्धरा-पतिवंशः करालकरवालधाराविदारितवैरिवारणकुम्भस्थलविगलितस्थूलमुक्ताफलालङ्कृतसमराङ्गण-धरणिस्तरणिप्रभावाधिकप्रभावविभवः प्रतिमल्लगजतुरगारोहणविचक्षणश्चन्द्रचूडचरणारविन्दमधुकरो विजितानेकाहवः श्रीमदाहवमल्लदेवो महाराजो बभूव, यस्य करकलितनिर्मलतरतरवारिधारा-तीर्थे मातङ्गपुत्रिकाभिगमनमहापातकी काञ्चीपुरपरमेश्वरः प्राणत्यागेन प्रायश्चित्तमकरोत्।

यत्र शासति वसुमतीम्—

मलिनता दीपशिखोद्गारेषु, चञ्चलता करिकर्णेषु, जडता नितम्बभारेषु, काठिन्यं रत्नेषु, रागः कामिनीहृदयेषु, तैक्ष्ण्यं कौक्षेयकधारासु, शृङ्खलाबन्धो व्यालगजेषु, कुटिलता कृष्णसारविषाणेषु, कर्णशून्यता कुण्डलिषु, छेदनं पत्रेषु, निम्नगत्वं कल्लोलिनीप्रवाहेषु, सुमनोबन्धः कुसुमेषु, दोषानुषङ्गस्तारकाचक्रेषु, हिंसा यागपशुप्रबन्धेषु, प्रायश्चित्तं मन्वादिषु स्मृतिषु, स्मृतिप्रमोषः प्रभाकरेषु, प्रियावियोगश्चक्रवाकेषु, गुणत्यागः सायकेषु, वर्णसङ्करो रूपसिद्धिषु, अश्रुपातो नटाभिनयेषु;

क्षणिकत्वं बौद्धेषु न प्रीतिषु, करपीडनं सहकारफलेषु न प्रजासु, विभ्रमो भामिनी-भ्रूलतासु न मनःसु, विषमत्वं कामबाणेषु न स्वभावेषु, दष्टाधरत्वं सुरतेषु न कोपेषु, प्रहारः पटहेषु न जन्तुषु, दण्डग्रहणं मुनिषु न जनेषु, दारिद्र्यं योषिन्मध्येषु न परिग्रहेषु, अविचारो जाबालेषु न कार्येषु, विग्रहशब्दः शरीरेषु न शत्रुषु, भूषणं वेशेषु न प्रवा[ से ]षु, अज्ञानं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पापेषु न शास्त्रेषु, कलङ्किता गर्भिणीकुचचूचुकेषु न चरित्रेषु, भयं रिपुचक्रेषु न स्वराष्ट्रेषु, परदाररसिकत्वं रणेषु न कामेषु, विस्वरश्रवणं वनेषु न गीतेषु;

प्रतिपक्षोदयश्चन्द्रमसि, प्रतिकूलवर्तित्वं सरसि, प्रतारकता नभसि, कृष्णवर्त्मता जातवेदसि, अक्षक्रीडासु मारणम्, योगमार्गेषु वहुधारणं दृश्यते।

यश्च वचसि वदने वक्षसि भुजे गाम्भीर्ये मनसि बले प्रतापे त्यागे विलासे विक्रमे धर्मे च सत्यसरस्वतीलक्ष्मीजयश्रीजलनिधिभवभक्तिभीमतपनकल्पपादपमनोभवत्रिविक्रमयुधिष्ठिरमय इव समस्तजनैरमन्यत;

अयं कलियुगस्य संहर्त्ता कृतयुगस्य कर्त्ता, अयं धर्मस्य दर्पणः पापस्यापसर्पणः, अयं भूमेर्भर्त्ता जयसंपदामाहर्त्ता, अयं कविवर्णनस्यास्पदम् उदारस्य यशसः पदम्, अयं विबुधानां संपत्तिहेतुः खलानां धूमकेतुः, अयं विदितसदाचारसिद्धान्तः शत्रुवर्गस्य कृतान्तः, अयं मूर्तिमकरध्वजः रिपुदैत्यगरुडध्वजः, अयं दिक्कामिनीगृहीतकीर्तिचामरः विविधपूजापरितोषितामरः, अयं यशःकुसुमभूषिभुवनः सच्चरितपावनः अयं लीलावशीकृतपरमण्डलः सकलारातिमहीभृदाखण्डलः इति यश्च सदा जनैरनेकप्रकारं स्तूयते;

यस्य चापूर्वः प्रबलः प्रतापदहनः प्रचण्डमण्डलाग्रधाराविदारितवसुन्धराधिपसहस्रनितम्बिनीनयनजलधरबाष्पधारासारैरवर्द्धत; यस्य चाभिनवया कीर्त्तिचन्द्रिकया प्रतिनरेन्द्रनयनकुवलयानामसुखमजन्यत; यस्य च नूतनस्तेजस्तपनः प्रतिभटहृदयेषु भयान्धकारमवर्द्धयत्; यश्च निजकुलनवप्रदीपः पात्रेषु स्नेहमपूरयत्; यश्च नवीनस्तेजस्वी कुमुदवनविकासं चकार;

यस्य चागृहीतप्रतिग्रहो न कश्चिद्विद्वान् ब्राह्मणः, नाकृतार्थीकृतः कश्चिदर्थी, न युद्धेष्वपराजितः कश्चिद्राजा, नानवलोकितयूपध्वजालङ्करणः कश्चित्प्रदेशः, न रूपदर्शनमात्राविगलितमानः कश्चित्कामिनीजनः, न सन्मानदानगुणावशीकृतः कश्चिद्भृत्यवर्गः, न वक्रसरसवचनाविस्मापितः कश्चिद्विदग्धगणः, नाज्ञासागरलङ्घनसमर्थः कश्चित्पार्थिवः, न यशः सुधाभिरधवलितः कश्चिद्दिग्भित्तिभागः, नानुदीरिताशीर्वादवचनो ललाटतटघटिताञ्जलिपुटः कश्चिज्जनपदः, नागृहीतशिक्षः कश्चिद्विचक्षणो, नाव्यावर्णितगुणगणः कश्चिद्विपश्चित्, नाननुष्ठितः कश्चिद्व्रतविधिः, नापरिज्ञातपूर्वः कश्चित्कलाविशेषः, नादत्तफलः कश्चिदुद्योगः, नापरिरक्षितः कश्चिच्छरणागतः, नानाक्रान्तः कश्चिद्भूमण्डलः, नागृहीतरत्नकरः कश्चिद्द्वीपाधीश्वरः, नामङ्गलतूर्योत्साहः कश्चिद् दिवसः, न त्रिवर्गानुपकारकः कश्चिद् व्यापारः समदृश्यत।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अक्षतैरिव कृपाणपाटितारीभकुम्भतटमौक्तिकोत्करैः ।
पूजयन् समरदेवताङ्गणं तत्क्षणाद्विजयसिद्धिमाप यः ॥

कोशस्थितिं विमुञ्चन् यदसिः प्रतिपक्षसंपदं हरति ।
अत्यन्ततीक्ष्णवृत्तेर्निस्त्रिंशस्य स्वरूपमिदम् ॥

शौर्योन्मत्तद्रविडनृपतिप्राणहारी मृधे यो
योऽरण्यानीमकृत नगरीं भोजपृथ्वीधवस्य ।
दत्वा कन्यामभयमकरोच्चैद्यभूपं नतं यो
यः सत्रासं व्यधित सततं गूर्जरक्ष्माभुजङ्गम् ॥

नारायणास्त्रवद्भाति यत्प्रतापो रणाङ्गणे ।
अशस्त्राननुगृह्णाति शस्त्रिणः पातयन् द्विषः ॥

अपूर्वः कल्पोर्वीरुह इव करो यस्य नृपते-
र्न केषामाश्चर्यं विरचयति चित्ते सुमनसाम् ।
फलं सर्वार्थिभ्यः प्रथमतरमिष्टं प्रवितरन्
दिशां भूषायोग्यं तदनु जनयन् कीर्तिकुसुमम् ॥

## [ महादेवीवाचल्लदेवीवर्णनम् ]

तस्य च यौवनश्रीरिव वयसः, गुणश्रीरिव धनुषः, विजयश्रीरिव क्षत्रस्य, मन्त्रश्रीरिव कार्यस्य, ज्ञानश्रीरिव योगस्य, श्रुतिश्रीरिव धर्मस्य, दानश्रीरिव यज्ञस्य उत्साहश्रीरिव वीरस्य, गजश्रीरिव राज्यस्य, चूतश्रीरिव चैत्रस्य, फलश्रीरिव वनस्य, भावश्रीरिव नृत्तस्य, अलङ्कारश्रीरिव गीतस्य, रसश्रीरिव काव्यस्य, अञ्जनश्रीरिव नयनस्य, तिलकश्रीरिव वदनस्य, ताम्बूलश्रीरिवाधरस्य, हारश्रीरिव कण्ठस्य, शिखरश्रीरिव भूधरस्य, बर्हश्रीरिव मयूरस्य, ध्वजश्रीरिव सैन्यस्य, कलशश्रीरिव प्रासादस्य, शोभाकरणहेतुः;

कल्पलतेव कल्पवृक्षस्य, रत्नमेखलेव मेरोः, मर्यादेव समुद्रस्य, वरत्रेव वारणस्य, नागवल्लीव क्रमुकस्य, प्रभेव महामणेः, छायेव पादपस्य, पालीव तटाकस्य, परिखेव प्राकारस्य, नेमिरिव चक्रस्य, सततसंनिहिता;

मकरध्वजस्य रतिः, राजचूडामणेर्गौरी, लक्ष्मीपते रुक्मिणी, सत्यवतः सत्यवती, विजयस्य सुभद्रा, क्ष्माभृद्वरस्य मेना, शतमखस्य शची, राज्ञो रोहिणी, वाचल्लदेवीति महादेवीपदाभिषिक्ता गौरवस्नेहपात्रं कलत्रमासीत् ॥ छ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ आहवमल्लयशोवर्णनम् ]

स च राजा दुर्वारप्रतापबलनिर्मूलितारातिवर्गो निरर्गलयशश्चन्दनप्रसाधितदिगङ्गनः प्रभूतदक्षिणाद्रविणपरिपूरणायाचकीकृतसकलत्रिप्रलोकः सङ्कल्पविषयातीतार्थिजनमनोरथ-कृतार्थीकरणनिर्जितकल्पवृक्षो दिग्विजयसमयलुण्ठितप्रतिभटभूपालभाण्डागारोपवृंहितन्यायो-पार्जितकरागणि[ त ]व्ययसहकल्याणकोशः कृतक्रियमाणकरिष्यमाणाप्रमाणदेवतायतनतटा-कवापीकूपारामप्रपासत्रसंसूत्रितधर्मप्रचारः; खलानुन्मूल्य, साधूनभिवर्ध्य, गुरून् संमान्य, पण्डितान् पुरस्कृत्य, कवीन् सत्कृत्य, बुद्धिवृद्धाननुसृत्य, प्रजाशिषः परिगृह्य, तस्करान् निहत्य, धूर्तान्नियम्य, कितवान्निर्वास्य, राजनीतिमवलम्ब्य, निष्कण्टकीकृतराज्यतया निश्चिन्तः; ततो मौलेषु चतुरुपधाशुद्धेषु कुलीनेषु नीतिशास्त्रपारङ्गतेषु शान्तेषु निर्मत्सरेषु प्रभुभक्तेषु शक्तेषूहापोहविनिश्चितमतिषु षाड्गुण्यतत्त्वविचक्षणेषु निरालस्येष्वनिद्रेषु साव-धानेषु नियामितेन्द्रियेष्वर्थार्जननिपुणेष्ववञ्चकेषु दृढचित्तेषु साहसशूरेषु पुरुषविशेषज्ञेषु स्वामिचित्तज्ञेष्वायव्ययदत्तचित्तेष्वकार्येच्छाप्रतिकूलेषु प्रियंवदेषु सत्यवादिषु मितभाषिषु सुरूपेषु गम्भीरेष्वक्रोधनेषु शुचिषु दक्षेष्वनुकूलेषु मधुपैयप्रभृतिषु मन्त्रिषु राज्यभरमारोप्य धर्मार्थाविरोधेन तृतीयपुरुषार्थसेवनाय चित्तमकार्षीत् ।

## [ आहवमल्लकामसेवन( प्रमदवनक्रीडा )वर्णनम् ]

स कदाचिद्रहसितद्विगुणीकृतमनोहरकुन्दकुसुमशोभे, नितान्तकोमलकरतलकान्ति-त्रिगुणीकृतरक्ताशोकपल्लवविलासे, रुचिरदन्तदीधितिचतुर्गुणीकृतसरससुपक्वदाडिमीबीजे, समुच्छलद्दशनच्छदच्छविप्रपञ्चपञ्चगुणीकृतबन्धुरबन्धुरबन्धुजीवपुष्पे, सरलबाहुतिलकाविलास-षड्गुणीकृतललितलतावितानेे, चेतोहरमधुरतरस्वरसप्तगुणीकृतमदकलकोकिलपञ्चमालापे, निका-मकुटिलबहलकुन्तलकलापाष्टगुणीकृतचटुलषट्चरणनिकरे, मुखकमलप्रचुरपरिमलनवगुणीकृत-विविधकुसुमसौरभभरे, मञ्जुमञ्जीरशिञ्जितसमाहूतकलहंसपक्षपवनप्रेङ्खोलिततलिनांशुकप्रकटी-क्रियमाणोरुयुलदशगुणीकृतरम्भास्तम्भविभ्रमे, तदित्थं प्रमदाजनपरितोषितविशेषगुणसंपदि, सप्रमदः प्रमदवने प्रणयिनीभिः सह चिक्रीड ।

## [ इतरकामक्रीडावर्णनम् ]

कदाचिद्रत्नमयभवनस्तम्भविन्यस्तशालभञ्जिकारूपातिशयवर्णनप्रकुपितप्रणयिनीभृकु-टिघटनोद्भटकटाक्षच्छटाभिस्ताड्यमानः प्रमोदमभजत । कदाचिद्गोत्रस्खलनकृतापराधलज्जया स्तम्भान्तरनिगूहिततनुरतिकुपितया दयितया 'धूर्त्त, दृष्टः क्व तिरोभवसि' इति सगद्गदम-भिधाय करकमलकलितलीलानीलोत्पलेनाहन्यमानविशदस्फटिकघटितभित्तिप्रतिबिम्बो 'मुग्धे

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सोऽहमित इत ' इति जहास । कदाचिदङ्गीकृताभीष्टकरणपणे लीलाद्यूते विजितः ' कितवहारितं पणितमप्रयच्छन् क गच्छसि ' इति प्रेयस्या शिरीषकोमललालितबाहुलताभ्यामाबद्ध्यमानः ' प्रिये ममात्र पराजयोऽपि जय ' इति सस्मितमुवाच । कदाचित्कलितसान्द्रचन्दनरसाच्छविलेपनाभिरामः समासन्नवनिताभरणमाणिक्यप्रभापुञ्जपिञ्जरितविशालवक्षःस्थलविलोकनसमुपजातप्रत्यङ्गनाकुचकुङ्कुमाङ्गरागसङ्गभ्रमया सरोषमीर्ष्यया ' किमिदम् ' इति कान्तया पृष्टः ' प्रिये विचारय, नाहमपराधकारी ' इत्युक्त्वा ससंभ्रममचिन्तयत् ।

कदाचिद्रतिकलहखिन्नया प्रियतमोरःस्थलमधिशयानया स्वप्नविलोकितप्रियान्याङ्गनालिङ्गनया तत्र प्रपञ्चितप्रणयकलहवचनाकर्णनप्रमुदितप्राणेश्वरप्रसादितया पुनरपि तथाविधस्वप्नदर्शनभयपरित्यक्तनिद्रया वल्लभया प्रतिक्षणं जागर्यमाणः परं मुमुदे । कदाचित्सुरतसङ्गरोद्दामरामागालिदानं वरप्रदानममन्यत । कदाचित्कुपितकामिनीसान्त्वनाय रतिसन्धिविग्रहाधिकारचतुरं दूतीजनं विससर्ज । कदाचिच्चित्रभित्तिलिखितविद्याधरमिथुनसङ्गमावलोकनजनिताभिलाषनिबिडरसो मनोभवक्रीडामसेवत ।

कदाचित् कामिनीवृन्दमध्यस्थितः कटाक्षविक्षेपभ्रूविभ्रमसरसवचनविलासहसित करतालिकादानचरणप्रहारादिविविधविलासचेष्टाभिः प्रतिमनः प्रेमातिशयं प्रकाशयंश्चातुर्योत्कमवाप । कदाचित्कान्तकरस्पर्शसमुल्लसितविपुलपुलके कपोलतले समुदितसान्द्रस्वेदोदबिन्दुसन्दोहप्रतिक्षणप्रक्षालनानिष्पन्नपुनःपुनर्लिख्यमानमृगमदरसविचित्रपत्रभङ्गव्यासङ्गेन दिवसमनयत् । कदाचिदतिसमुन्नतपीनपयोधरायास्यमानक्षाममध्यप्रदेशं पृथुलनितम्बबिम्बगौरवमन्थरगमनं स्वयमेव दत्तहस्तावलम्बनस्तरुणीजनं क्रीडार्थं क्रीडापर्वतकमारोहयत् । कदाचिन्मुग्धवधूनां रतिवैचक्षण्यशिक्षणाय क्षीरनीरतिलतण्डुलीयकवृक्षाधिरूढलतावेष्टकाद्यालिङ्गनाभिरामकिन्नरमिथुनमयविलासं भवनवलभीसुधाधवलितभित्तौ सकलकलापरिपूर्णो राजा चित्रमालिलेख । कदाचित्प्रणयकलहकुपितश्चरणसरसिजप्रणामपुरःसरं विषमशरप्रहारविह्वलाभिः प्रमदाभिः प्रसाद्यमानो मुदमुवाह ।

कदाचिदन्तःपुरमेकाकी प्रविश्यान्तर्हितः प्रदर्शितनिरन्तरस्नेहसरसानि निवेदितकुसुमशरविशिखनिर्मितनिबिडमर्मपीडानि वचनान्यशृणोत् । कदाचिदभिनवशाद्वलस्थले विचित्रनेत्रकाण्डपटपरिघटितपरिवेष्टने मदभरपाटलीकृतविमलकपोलफलकानामुद्भ्रान्तविश्रान्त नयनरक्तोत्पलानामवशोल्लसितानन्विताव्यक्तस्खलितजल्पितानां कनकचषकविनिहितविविधकुसुमाधिवासितसीधुपानकेलिलालसानामन्तःपुरसीमन्तिनीनामविदितनितम्बबिम्बविस्रस्तवस्त्राणि किञ्चिदुन्मार्जितलज्जालवानि प्रकटितमन्मथरहस्यायमानगोप्यवचनानि चेष्टितानि विलोक्यापसारितसहचरद्वित्रप्रसादवित्तकस्ताभिराकुलीक्रियमाणः परिरम्भभवं सुखमनुबभूव ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कदाचिदतिरभसप्रवृत्तसुरतसमरपरिश्रान्तस्तुङ्गसौधोर्ध्वभूमिस्थितचन्द्रकान्तमणिपीठनिवेशितसुरभिकुसुमशय्यायामासीनः प्रमदवनलतान्दोलनलब्धविचित्रपुष्पसौगन्ध्येन गन्धवाहेनापनीयमानस्वेदजलकणः समाकुञ्चितप्रियजानुविहितावष्टम्भया संमुखोपविष्टया कुचतटविस्रस्तवसनया दयितया दीयमानकर्पूरकस्तूरिकाविमिश्रचूर्णावलिप्तपाकपरिपाण्डुरनागरखण्डपर्णवीटिको विजितधवलचारुचामरविलासममृतकिरणकिरणकलापं सिषेवे ।

## [ विविधविनोदवर्णनम् ]

कदाचिन्नाट्यमण्डपे समुपविष्टो देशिकारमार्गभेदभिन्नविविधयतिरीतिरचितं स्निग्धमधुररक्तकण्ठगायकगायनीसुप्रयुक्तसुव्यक्तमधुरवेणुवीणारणितानुगुणितं वाद्यमानमन्दमृदङ्गपटुपटहहुडुक्कहिक्कोल्लासमनोहरमन्तःपुरसीमन्तिनीरसभावभरितललितलास्यं सङ्गीतकं निशशाम ।

कदाचित्प्रणयिनीभिः सह विहितप्रणयपणं प्रकटितपरस्परजयपराजयाभिलाषमाबद्धकुतूहलं लावकमेषकुक्कुटाहवं प्रावर्त्तयत् ।

कदाचिदयं शृङ्गारिणामग्रणीरद्भुतरूपविलोकनकौतुकीति चतुरचित्रकरैश्चित्रफलहकेषु विलिख्य विलिख्य समानीतानि नूतननिरतिशयवयोरूपविभ्रमशालिनीनां दूरदेशान्तरभूपालकन्यकानां बिम्बानि विलोकयन्ननुरागं भेजे ।

कदाचिदश्ववाह्यालीविहारचतुरोऽश्ववारदर्पदलन इत्यन्वर्थनामानं काम्बोजवाजिनं शूकलमतिदृढासनः समारुह्य प्रणयपात्रैरश्वारोहणविद्याकुशलैः क्षितिपालपुत्रैः सह क्रीडन् कन्दुकक्रीडोत्कर्षमन्तःपुरवधूनां पौरजनानां च प्रादर्शयत् ।

कदाचिदारचितचतुरशृङ्गारो मतङ्गजवाह्यालीकलितकौतुको मध्यमोत्कृष्टावकृष्टपूर्वासनत्रैकजानुविनतोभयजानुविनतोत्कुटुकमण्डूककूर्मात्मकपञ्चविधापरासननिपुणः सुरेखताक्रियाकौशलबलवत्तारोहकगुणत्रयसंपन्नः अत्यर्थोत्तानान्वर्थप्रत्यर्थगम्भीरवेदीतिपञ्चविधवेदितज्ञो गात्रद्वयोभयपार्श्वापरयुग्मसुखवृक्षाद्यष्टविधारोहणप्राचीनाष्टावयवसहितकर्णझम्पाश्रयदशावरोहणप्रवीणः उभयपार्श्वजघनद्वयमेचकस्थानपञ्चमुद्गराघातदक्षो वचनपादाङ्कुशशरीरप्रणिधिचतुष्टयवेदितेषत्स्पृष्टप्रणिधानपीडनोत्क्षिप्ततिर्यगाहतेतिपञ्चघाततोदावकर्षणपीडनोत्कर्षणचतुर्विधक्रियाघाताभिज्ञः प्रतिक्षिप्तातिक्षिप्तप्रहृतसूक्ष्मादीर्णपञ्चप्रकाराङ्कुशप्रचारप्रवीणः षष्ठीमतिवर्तिनीं बाह्यां मदावस्थामनुप्रविष्टमालानमुन्मूलयन्तं रात्रौ परिभ्रमन्तं श्रोत्रनेत्रपर्यन्तपरिस्रवद्दानप्रवाहं भयानकदर्शनं कोशस्रवन्मदजलशैवालितापरं जितप्रणिधिचतुष्टयं जलप्रतिबिम्बितमात्मानं प्रतिगजबुद्ध्या निजविषाणाभ्यां विदारयन्तमग्रचरणमुत्क्षिप्य स्तम्भमारुरुक्षन्तं कृतकण्ठगर्जितं करेणावेष्ट्य



P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

विषाणं तिर्यग् व्रजन्तं पुरतः प्रेर्यमाणमपि पश्चाद् गच्छन्तं बद्धं मोक्तुमशक्यं मुक्तं नियमितुमसाध्यमारूढस्यावरोढुमविषयमवरूढस्यारूढमगोचरमसोढतूर्यडिण्डिमहरिखुरकरिघण्टारवं कृष्णशीर्षसितदन्तद्वेषिणं विरहिणमिव निद्रानभिज्ञं व्यसनिनमिव परित्यक्ताहारं महाव्रतिनमिवास्थिभूषणं राक्षसमिव सर्वप्राणिहिंसाकरणरुचिं कालमेघमिव गम्भीरगर्जितं कृत्रिममिवापरिज्ञातवेदनं मूर्खमिव वचनातिवर्त्तिनमविनीतमिव निरङ्कुशं सगर्वमिव मदोत्क्षिप्तहस्तं प्रतिकुम्भिकुम्भसिन्दूरधिया नवोदितमार्तण्डमण्डलमपि सासूयमवलोकयन्तं करिविषाणं भ्रान्त्या पञ्चमीचन्द्रमसि सकोपां दृष्टिमर्पयन्तं भद्रजातिमैरान्व(व)तान्वयं वैष्णवांशं सत्त्वप्रकृतिं सिंहान्तकं कालिङ्गवनसंभवं शिक्षितैकाशीतिविधवधं प्रकटीकृतसान्द्रसिन्दूरधातुरागं बहुमुखवहदमन्दमदनिर्झरमत्यन्तमनोहरधनुर्वंशं प्रकाशितनिरन्तरदन्तशोभं चलन्तमिव पर्वतं बद्धपट्टिकावरत्रावेष्टितमध्यं रुचिररुक्मपरिघटितशृङ्खलापरिकलितकक्षाभागं सुवर्णमयरत्नखचितकीर्तिमुखखोलकालङ्कृतदन्तमनेकसंख्यविजयसंख्याग्रन्थिभिरिव नक्षत्रमालामौक्तिकपङ्क्तिभिर्विराजमानमूर्धानमाहववीरनामानं गन्धसिन्धुरमारुह्य निरवद्यामारोहकविद्यामुद्द्योतयामास ।

कदाचित्करेणुकारूढान्गुरो वाद्यमानवीरमृदङ्गांश्चतुरचुञ्चुविरचनाशोभितकुन्तलानुरसि दोलायमानशङ्खमणिग्रन्थिकाबद्धनेत्रपट्टच्छटाविराजितान् व्याघ्रकृत्तिखचितदृढनिबद्धविपुलदलकपरिवेष्टितवरपट्टिकाविचित्रनेत्रपट्टजानुचुम्बिलम्बमानाञ्चलनिचयचारुवीरवेषान्, कांश्चिदेकगणिकासंगममत्सराविष्कृतरोषान्, कांश्चिदुद्भटदर्पविपणिमार्गविकीर्णतृणान्, कांश्चित्प्रकटितभृगुचण्डिकावेतालमतत्रयविद्यामत्सरान्, कांश्चित्कुपितनिजस्वामिप्रस्थापितान्, कांश्चिदद्रविणतया वेश्यागृहनिःसारितान् (युद्ध्वा)[ध]नानि लब्धुमाधावितान्, कांश्चिदाबद्धमूर्धधवलवटिकान्, लम्बकच्छटान्, कृकाटिकापृष्ठलुठज्जूटकान्, ह्रस्वासिधेनुभृतश्च खड्गफलकधारिणश्चोद्भटलाटभटान्, कांश्चिदुत्क्षिप्यमाणदीर्घकुन्तधारिण आन्ध्रान्, कांश्चिदुत्खातदीर्घासिधेनुधरान् द्रविडानङ्कखलके योधयामास ।

कदाचिदपहसितचाणूरकीचकभीमबलं कंसासुरविध्वंसनसमयकृष्णदेवविनिर्मितविविधबन्धविबन्धमोटनोपायविज्ञानविजितश्रममहाकाय(श्रेष्ठयोधमल्लप्रवर्तितं युद्ध)मद्राक्षीत् ।

कदाचित्सरससुकविनिकुरम्बविरचितमहाप्रबन्धश्रवणेन, कदाचित्कुब्जवामनकिरातदर्शनाविष्कृतकौतुकेन, कदाचिच्चारणगणक्रियमाणनृत्तगीतविलोकनाकर्णनरसेन वासरमनैषीत् ।

कदाचित्पुरोगान्तमहातटाकेषु तटिनीषु च कृकलासलाङ्गूलानुकारि(विप)....पिच्छवंशलताप्रसंदानितनीरान्तरालप्रसारितमधुरसावल्कलवलितललितदृढतरसमसूक्ष्मगुणनिबद्धनिस्तूलमायूरपिच्छकांडक........ज्यमानगुणाग्रनियन्त्रितसपिष्टसामिषतीक्ष्णलोहकुटिलगलिकानिगि-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लनान्, दृढाघातवडिशाग्रप्रोततुण्डान्, रज्जुत्रोटनाय द्रुततरजवेन सर्वतो धावमानान्, अत्याकर्षणनमनकुण्डलीकृतकरतलगतलतिकान्, प्रतिपक्षानिव विहितबहुतरवारिप्रचारान् मत्स्यानाचकर्ष ।

एवमत्यन्ताशक्तिमन्तरेणाप्रमादितयान्तरान्तरावश्यकर्तव्यानि राजकार्याणि कुर्वन् कारयन् साम्राज्यस्य यौवनस्य फलमिदमित्येतानन्यानपि नानाविधान् विनोदानुपजनितकौतुकरसाननुबभूव ।

किं बहुना, यदुचितं नवयौवनस्य यदुचितं चित्तवृत्तेर्यत्प्रसाधकं विदग्धजनानां यदबाधकं लोकद्वयस्य, तदपरमप्यविकलतया विवेकस्य स्थिरतया सदुपदेशस्य पटुतया पूर्वजन्मसंस्कारस्य निर्मलतया श्रुतस्य यथा न धर्मः सीदति यथा न कीर्तिर्म्लायति यथा न लक्ष्मीरुद्विजते यथा न प्रतापस्ताम्यति यथा न प्रजा विरज्यन्ते तथा सर्वमन्वतिष्ठत् ॥ छ ॥

## [ सन्तत्यर्थं सन्तापः ]

एवं च तस्य तया देव्या सह रममाणस्य सततं सुखमय एव जगाम कालः । यद्यन्मनसा चिन्तितं यद्यद्वचसाभिहितं तत्तदभिमतमखिलं पुराकृतसुकृतवशान्निरतिशयनयसहायपौरुषप्रभावादाससाद । केवलमिह परत्र चोपकारि निजानुरूपनन्दनमुखेन्दुदर्शनामृतं नयनाञ्जलियुगलेन पातुं न लेभे ।

ततः कदाचिद्विसर्जितातिसन्निहितातिप्रसादपात्रकतिपयविबुधकविगायकवादकसेवकराजलोकसङ्कोचितसकलजनव्यापारायां, गगनतलमध्यवर्त्तिराकासुधाकरकरनिकरधवलीकृतसकलदिगन्तरालायां, समुन्निद्रकुमुदिनीसमालिङ्गनसुरभिपरिमलितमन्दमारुतायामुत्कूजद्गगनतलवर्त्तिवर्त्तिकायां, सान्द्रचन्द्रिकारसास्वादनप्रमुदितमत्तचकोरनिकरायां, निजनिजस्थानान्तरप्रविष्टयामिकजनायां, पुञ्जीकृततमःस्तोमायमानप्रतियामनिरूपितस्तम्बेरमायां, भविष्यद्बालातपपरमाणुप्रतिरूपप्रवर्त्तितदीपपरंपरायां निशीथिन्यां क्रीडामण्डपादुत्थाय संवाहनक्रियाकुशलतरुणविलासिनीजनकनकनूपुरमधुरतररवविज्ञप्यमानशयनसमय इव देव्या गृहीतकरः शरदभ्रविभ्रमानुकारिराजहंसोदरपिच्छगुच्छपरिपूरिते सितनेत्रप्रच्छदाच्छादिते विचित्रपटीपरिघटितसुकुमारोभयोपधानशोभिते कर्पूरागरुधूपपरिमलवासिते क्षीरसागरतरङ्गनिर्मले समुन्नतरत्नरचितमञ्चकविन्यस्ते विलासतल्पे नारायण इवानन्तभोगलालिततनुर्लक्ष्म्येव तया देव्या सह शयानः पुत्रप्रशंसापरं पुराणवचनमाकर्णयन्निद्रामकरोत् ।

ततः संजातनिद्रो नरपतिररतिरमणीयवेषैः सितमाल्याम्बरमौक्तिकाभरणधारिभिर्दरहसितप्रसन्नवदनारविन्दैः पितृभिः 'वत्स ! स्वाध्यायाध्वरदानादिभिस्त्वया राजन् ! देवर्षयः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कृतार्थीकृताः । न पुनरस्मदृणापहरणनिपुणः स्वस्यानुरूपः कश्चिदात्मजोऽद्यापि समुत्पादितः ’ इति स्वप्नेऽभिहितः सहसोत्थाय तत्क्षणादेव महतीमपत्योत्पत्तिनिमित्तां चिन्तामुवाह ।

## [ अपत्योत्पत्तिनिमित्तचिन्तावर्णनम् ]

यया निरन्तरप्रवृत्तया परितप्यमानमानसः परिम्लानवदनचन्द्रो दीर्घमुष्णं च निःश्वसन्नूर्ध्वमधश्चावलोकयन्निवारिताशेषपरिजनप्रवेशः स्वहस्तकमलविन्यस्तकपोलफलको राज्यानुबन्धमपि निर्बन्धमिव, सिंहासनाध्यासनमपि प्रवासमिव, संसारोपभोगमपि निरुपयोगमिव, कामिनीजनक्रीडामपि व्रीडामिव, कृतपुरुपकारमप्यनुपकारमिव, अपरिमितधनरत्नोपार्जनमपि निष्प्रयोजनमिव, चतुरङ्गबलौघमपि मोघमिव, गीतादिविनोदमपि मनस्तोदमिव, शृङ्गारमपि भारमिव, भूषणमपि दूषणमिव मन्यमानः सविषादोऽवशिष्टां निशीथिनीमनैषीत् ।

ततः प्रतिदिवसमाकर्ण्यमानतीक्ष्णकरप्रतापभयपलायमानदुर्जनसहायान्धकारारातिविजयतूर्यनिर्घोषानुकारिसमुल्लसद्देवतायनप्रगेतनतारतरशङ्खपटहकालपटुतररवायां समासन्नमिव समागमोत्सुकपुरुहूतदिग्वधूविधीयमानारुणकरघुसृणमुखविलेपनायां दोषानुषक्तनिरुद्धमधुपकुलविमोचनोज्जृम्भिताम्भोरुहायां विरहज्वरविमुच्यमानचक्रवाकमिथुनसमागमोत्सवपरिदृश्यमानपक्षविक्षेपोच्छलज्जलकणमौक्तिकमङ्गलाक्षतक्षेपायां रोहिणीरमणवियोगवेदनादूयमानकुमुदिनीनायिकायां कुलायगतशकुनिकुलकोलाहलाभिव्यज्यमानयामिनीविरामायां मङ्गलपाठकपठ्यमानप्राभातिकसूक्तिश्रवणसमुत्सुकजनायां प्रभातवेलायां निजनिजव्यापारसमागतैः पुरोहितसहितैः प्रकृतिपुरुषैः कथमपि लब्धप्रवेशैरज्ञाताभिप्रायैः किमिदमिति मनसि विमृशद्भिः सविनयं शनैः शनैः समीपमुपसृत्य धरणितलघटित जानुकरयुगलनिटलतटं प्रणम्योपविश्य च कञ्चित्कालं तूष्णीं स्थित्वा मुखनिहितोष्णीषपर्यन्तैर्बद्धाञ्जलिपुटैर्विज्ञप्तः—‘ देव, किमित्युपेक्षितं दर्पणाज्यावेक्षणम् । देव, किमिति प्रतिषिद्धास्तिथिवारनक्षत्रादिकथनोद्यताः प्रसिद्धमौहूर्त्तिकाः । देव, किमिति स्नानविधिना नाद्यापि सफलीक्रियन्ते सकलतीर्थजलानि । देव, किमिति चुम्बितगगनाङ्गणेऽपि भगवति भानुबिम्बे विलम्ब्यते सान्ध्यो विधिः । देव, किमिति न प्रसन्नेन चक्षुषा निरीक्ष्यन्तेऽस्मन्मुखानि । देव, कस्मादकस्माद्विषादपङ्कः कलुषयति स्वामिनो मानसमेतन्निदानमस्माकमादिश्यतां करुणार्द्रया धिया ’ इति । ततः स पार्थिवो मन्थाचलमथ्यमानाम्भोनिधिध्वानगम्भीरया गिराऽपत्यरत्नलाभोत्सुकस्तान् प्रति यामिनीतृतीययामपरिदृष्टं निखिलमपि स्वप्नवृत्तान्तमावेद्य पुनरब्रवीत् ॥ ६ ॥

## [ सन्तत्यभावविलापः ]

अयं गृहस्थाश्रममहीरुहः फलविहीनतया दुनोति मे चित्तवृत्तिम् । पुत्रचन्द्रोदयं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विना चालुक्यवंशसागरो न परिवर्द्धेत इति विकलतां वहति मे हृदयम् । सोऽयमद्वितीयः सम्यगात्मसमानेन तनयेन विना सकलभुवनभारोद्वहने निःसहायस्ताम्यति मे बाहुः । अविच्छिन्ननिखिलजगत्त्रयविजयमप्यात्मानमनन्यसामान्याधिकगुणेनात्मजेन पराजीयमानमभिलषन् खेदमनुभवति ममाशयः । वाद्यमानमृदङ्गमुरजगीयमानस्निग्धगीतलीलाचलद्विलासिनीकनककिङ्किणीझणत्कारकरेणुघण्टारणितनृत्यत्सांम्राज्यलक्ष्मीपरिशोभितमपि नन्दनमन्तरेण शून्यं पश्यामि गृहाङ्गणम् । निरतिशयभाग्यरूपसौभाग्यसंपन्नापि समासादितपतिप्रसादापि रुचिररत्नाभरणभूषिताप्यङ्कपर्यङ्कवर्तिनमात्मजमन्तरेण न विराजते महादेवी " इति ॥

ततस्तदाकर्ण्य प्राणेश्वरस्य वचनं समीपगता महादेव्यपि तत्कालोपनतखेदव्याकुलमानसा विमुक्तदीर्घनिःश्वासा पक्ष्मप्रङ्खोलनपरंपराप्रयत्ननिरुद्धबाष्पबिन्दुसन्दोहाश्लक्ष्णमधुरगद्गदया गिरा तानेवं बभाषे ।

## [ महादेवीविलापः ]

' वरमङ्गीकृतात्मजगुणा न्यायवैशेषिकी स्थितिः । वरमपत्यपरिवारा विरोधिनामवरोधवधूः । वरं परिदृष्टवंशप्रवृद्धिर्विपिनस्थली । वरं समासादितप्रसवफला लताविततिः । वरं परिगृहीतगर्भा केतकीततिः वरमभिनन्दनीयनन्दना ससन्ताना निरशनभूमिः । वरं परिकलितबालका वनराजी । न पुनरहं वर्णनार्हाऽप्राप्तापत्यतया दुःखभागिनी ' इति एवं स्वामिनो रुदीरितं निशम्य पुरोहितप्रभृतयो विदिताशयाः किमिदं गहनमिति चेतसि विमृश्य कृतनिश्चयाः परस्परमालोक्य मुखानि परिमितं च हितं च दुःखापनयनक्षमं च युक्तं च वक्तुमारेभिरे ।

## [ आहवमल्लं प्रति समाश्वासनम् ]

देवस्य हि समस्तवेदस्मृतिपुराणेतिहासशास्त्रसागरपारगस्य सहजोत्साहशक्तिसंपन्नस्य कुशाग्रीयप्रज्ञाविजितसुरासुरगुरोर्विदितसकलवेदितव्यस्य धीरस्य किमस्माभिरविदितमावेद्यते । तथापि भक्तिभरितभावैरस्माभिः किमप्यभिधीयते । किमिति स्वामिना निरन्तरं चिन्तायामात्मा समर्पितः । किमस्ति सम्यगनुष्ठितानां दानतपसामसाध्यम् । किमस्त्यलभ्यं परितोषितेभ्यो विप्रवरेभ्यः । किमस्ति दुर्लभमाराधिते भगवति भवानीवल्लभे । तथाहि निर्भरभक्तिभरपरितोषितऋष्यशृङ्गमुनिहुतवहहुतावशिष्टचरुपिण्डाशनेन पत्नीनां वृद्धोऽपि दशरथनरेन्द्रः किं न लेभे रघुवंशतिलकरामचन्द्रप्रमुखांश्चतुरः पुत्रान् । तथाहि युवनाश्वो महीपतिर्मुनिमहाश्रमे तेषां शुश्रूषां कुर्वन् तनयालाभेन दोदूयमानमानसस्तैरेव प्रसन्नैः पुत्रेष्टिं कारितः प्रमादपरिपीतमन्त्रपूतजलपरिणामतः सकलजगत्त्रातारं मान्धातारं तनयं किं स्वयमेव नालभत । तथाहि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दिलीपोऽपि तपोवरिष्ठवसिष्ठोपदिष्टनन्दिनीप्रभावात् किं न रघुमलघुप्रतापमात्मजं लभते स्म। तथाहि देवावृधो वसुधाधिपः पर्णाशामहानदीमहिम्ना शरदभ्रविशदयशोराशिशुभ्रीकृतत्रिभुवनं बभ्रुं किं नासूत सुतम्। तथाहि किं न कश्यपमुनेर्वालखिल्यवितीर्णार्धनिजतपःसमृद्ध्या विनतादेवीविहितसुमहत्तपःप्रभावाच्चाद्भुतप्रभावो गरुत्मानजनि। तदेवमपरिगणितानि ब्रह्मर्षीणां महिमाद्भुतानि। तथाहि निजाज्ञामात्रखर्वीकृतविन्ध्यपर्वतेन कुम्भसंभवेन मुनिना चुलुकक्रोडे निधाय किं नापायि पयोनिधिः। किं वा न निरुपमाद्भुतपवित्रतपश्चरित्रेण विश्वामित्रेण वसिष्ठाभिशापजातचण्डालभावत्रिशङ्कुप्रार्थितेन सकलसुरविरोधी नूतन[ः]स्वर्गसर्गो व्यधायि। किमृचीकस्य प्रवृत्ताघमर्षणस्य महाकल्लोलकलकलाकर्णनप्रकुपितस्य प्रस्फुरदुद्धुरहुङ्कारकातरा गौतमी गङ्गा न द्विधा बभूव। किं बहुना, ब्राह्मणप्रसादान्न किञ्चिन्न लभ्यते। ततो देवेनापि ब्राह्मणपरितोषणपूर्वकमनन्यसामान्यसन्त[ति]समुत्पादनसमर्थः कश्चिद्विधिर्विधातव्यः इति विज्ञप्य तूष्णीं तस्थुः।

## [आह्वमल्लदैनिकविधिवर्णनम्]

ततः स महाराजः 'सम्यगेवेदमभिहितं भवद्भिः' इति तेषां वचनमनुमोद्य महादेवीं च समाश्वास्य मनोव्याकुलतां विहाय, ततः सर्पिषि दर्पणे च मुखमवलोक्य प्रक्षालितवदनकमलः प्रातः सन्ध्यामुपास्य मौहूर्त्तिककथिततिथिवारनक्षत्रकरणयोगग्रहोदयराशिसञ्चारादिफलोदयमाकर्ण्य पुरोधसा दक्षिणहस्तविन्यस्तदक्षिणावर्त्तशङ्खोपनीतान् मन्त्राक्षतान् परिगृह्य भूविभावसुपुरोहितेभ्यः सकर्पूरं ताम्बूलं वितीर्य शयनगृहान्निर्गत्य कपिलामुपस्पृश्य भगवन्तं भास्करं नमस्कृत्यावश्यकर्तव्यानि कार्याणि निर्वर्त्य सुखासनमधिरुह्य सूतमागधवन्दिजनैः स्तूयमानपवित्रचरित्रस्तत्कालसमागतसेवकराजलोकप्रणतीरवलोकयन् देवतार्चनभवनमगमत्।

तत्र च मज्जनशालामनुप्रविश्य शातकुम्भकुम्भनिहितैः सर्वौषधिसहितैः सकलतीर्थसलिलैः सस्नौ। ततो धौतधवलपट्टवाससी वसानश्चारुचामीकरनिकरखचितचम्पकपीठोपविष्टः सुपरीक्षितकुलाचारशीलेभ्यो वेदवेदार्थविद्भ्यः सुमूर्तिभ्यः समाहिताग्निभ्यो यागोपनयनविवाहकरणोद्यतेभ्यो बहुकुटुम्बिभ्यः स्वदेशनिवासिभ्यो देशान्तरागतेभ्यश्च ब्राह्मणवरेभ्यः श्रद्धया सन्मानपुरःसरं गोधेनुहिरण्यवासोरत्नगजाश्वग्रामादिकं यदभिमतमात्मनस्तेषां च तदखिलमपरिमितं नित्यदानमदात्।

## [पुत्रोत्पत्त्युपायान्वेषणवर्णनम्]

ततः पुरोहितराजगुरुपौराणिकस्मार्तान् न्यायमीमांसाविचारचतुरान् सौरपाशुपतवैष्णवागमक्रियाकुशलान् समाहूय तैः सह पुत्रोत्पत्तिनिमित्तं को वा स्यादुपाय इत्यन्वेषयामास।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततस्तैः पुराणधर्मशास्त्राण्यवलोक्य विचार्य चात्रिभरद्वाजभृगुवसिष्ठगौतमविश्वामित्राङ्गिरःसदृशै-र्द्विजोत्तमैरित्थमभिहितः—

'देव तुलापुरुष-ब्रह्माण्डविश्वचक्र-हिरण्यगर्भ-कल्पवृक्ष-लता-पञ्चलाङ्गलगोसहस्र-रत्नधेनु-हिरण्याश्वहस्तिरथमहाभूतघट-सप्तसागर-धराहिरण्य-हयहिरण्यधेनुभिरित्येतैः षोडश-भिर्महादानैरपनीय पुराकृतं दुष्कृतं निर्मलमनःकायः पुत्रकाम्यया भगवन्तं शक्तिमत्कुमार-जनकं पार्वतीपतिं परिपूजय। अस्माभिरपि त्वत्कृतसन्मानदानपरितुष्टमानसैः पुत्रोत्पादन-योग्या विशिष्टा काचिदिष्टिरनुष्ठीयते। महाराज सकलाभिमतमनोरथसिद्धिर्भविष्यति। तत्र-भवता भवता चेतसि न संशयो विधातव्यः' इति।

अभिधायो[?]महाराजोऽपि कर्णाञ्जलिपुटैः परिपीय वचनामृतं तदानीमेव संजात-पुत्रमात्मानममंस्त। ततः प्रविश्य देवतापूजागृहं प्रणम्य च साष्टाङ्गं गोमयोपलिप्तायां भूमौ पद्मासनासीनो विधिवन्मन्त्रमुद्राविधिना विहितात्मपूजः पश्चात्सौवर्णमयरत्नखचितपीठे प्रतिष्ठाप्य चन्द्रकान्तरत्ननिर्मितमतिविततकान्तिसन्तानैश्चन्द्रिकामिव सान्द्रीकुर्वाणं श्रीकण्ठलिङ्गं पञ्चा-मृतैः सुगन्धिसलिलैः स्नपयित्वा चन्दनहरिचन्दनकर्पूरमृगमदरसेन विलिप्य चारुचम्पकसुगन्धि-सुरभिविकचविचकिलसुपत्रशतपत्रे[1]न्दुप्रियेन्दीवरबहुलबकुलसमृद्धमाधवीपाटलपटलसुवर्णवर्ण-कार्णिकान्[?]सुकुमारगन्धकरवीरत्रिशाखबिल्वपत्रादिमाल्यैः[2] समभ्यर्च्यागुरुकर्पूरादिदशाङ्ग-धूपकर्पूरदीपविविधान्नभक्ष्य[3]फलनैवेद्यताम्बूलोपहारघण्टारवनृत्यगीतवाद्यसङ्गीतकपुरःसरं मौनास-नमनोनिरोधेन समाहितो भूत्वा स्वच्छन्दरूपिणं भगवन्तं पञ्चवक्त्रं नित्यविधिना समपूपुजत्।

ततो निर्गत्य देवतागारात्कृतचारुवेषः समस्तसेवकजनदत्तावसरमास्थानमण्डपमया-सीत्। तत्र च सबहुमानमाहूयात्मद्वितीयस्थानस्थापितं गृहमहत्तरं 'षोडशमहादानोपकरण-मण्डपांस्त्वरिततरं निष्पादये' इति समादिदेश। सोऽपि 'तथा करोमि' इति मस्तकन्यस्त-हस्तस्त्वरया प्रणमन्निर्गत्य स्वामिनां समादिष्टे दानोपकरणकर्मणि प्रवीणान्निजपुरुषान्नियुयोज।

ततः स राजोभयसान्धिविग्रहिकविज्ञप्यमाननानादेशान्तरायातदूतवार्त्ताकर्णनदत्त-चित्तस्तानि तानि कार्याणि विचार्य तत्र तत्र कृतप्रतीकारो भीतप्रतिभूपप्राभृतोपढौकितानि गजवाजिकनकामूल्यरत्नविचित्रवस्त्राण्यवलोकयन् स्वयमपि तुष्टः प्रसादान् ददन् अमितमहिमा महीमण्डलप्रभुर्विसर्जितकार्यपुरुषः सेवासमागतसामन्तमण्डलेश्वरराजपुत्रप्रसादविनोदपात्रपरि-वृतो विज्ञापनाय संमुखमागच्छन्तं महानसाध्यक्षमवेक्ष्य भ्रूसंज्ञया समादिशत्। अनन्तरं भोजनसमयशंसी मनःप्रीतिकरः श्रवणमधुरः शङ्खध्वनिरुदगात्।

1 -सत्पत्रे- MS. 2 -माल्यैः MS. 3 -भक्ष- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ केचिद्रजतरुचिररुक्ममयस्थगितमस्तकस्थालधारणोत्क्षिप्तबाहुलताः प्रकटितश्लक्ष्णकक्षोन्नतस्तनतटार्द्धा दासीजनाः, केचित् स्कन्धारोपितवीवधान्तर्निहितसितपट्टप्रच्छादितविविधान्नरसवतीभाण्डा विश्वाससहवासिभिरनुगता वैवधिकाः, केचित्सम्यगन्नरसपाकपरीक्षणविचक्षणा भिषजः, केचित् सौवर्णदर्वीधारिणः शिरोवेष्टनपिहितवदनाः सूदाः, केचिन्निर्मलशीतलोदकभरितसुवर्णकलशभराः करकाधिकारिणः, केचिद् भोजनमण्डपाभिमुख[खं ?] धावमानाः समदृश्यन्त ।

ततः समुत्थाय राजा भोजनमण्डपं प्राविशत् । तत्र च तैः परिवृतोऽभिमतममृतोपमं षड्रसं मधुरप्रायं पथ्यं पवित्रं भोजनं विदधे । ततः समुत्थाय विसर्जितसकलराजलोकः कतिपयैः प्रसादवित्तकैः[1] परिवृतो विलासमण्डपमगमत् । तत्र च कतिपयैः प्रसादविनोदपात्रैर्नर्मसचिवैः सह तास्ताः कथाः प्रवर्त्तयन् वासरशेषमनैषीत् । रात्रिमप्यकृतविनोदविलासामनयत् ।

## [ षोडशमहादानवर्णनम् ]

अपरेद्युरुत्थाय विहितसन्ध्याद्यवश्यकरणीयः द्वारचतुष्टययुक्तान्, समचतुरस्रषोडशहस्तान्, एकहस्तोच्छ्रितसमचतुरस्रसप्तहस्तवेदिशोभितमध्यभागान्, चतुर्दिशं चतुर्भिः कुण्डैरलङ्कृतान्, ग्रहलोकपालदेवतापूजार्थमीशानकोणघटितहस्तप्रमाणवेदिकान्, पूर्वादिदिक्प्रदक्षिणक्रमेण द्वारशाखानिबद्धाश्वत्थोदुम्बरप्लक्षवटपल्लवनिर्मिततोरणावलिकलितरामणीयकान्, आर्द्रार्द्रक्षीरवृक्षशाखासहस्रसमाच्छादितान्, अतिस्वच्छपञ्चवर्णपट्टविरचितवितानविराजितान्, पवनोद्धूयमानबहुपुण्यलाभोत्सववैजयन्तीसमानविराजमाननानावर्णध्वजलोकपालवर्णसवर्णाष्टदिग्भागनिवेशितपताकान्, प्रत्येकमभ्यस्तवेदार्थपुराणेतिहासस्मृतितत्त्वेन सुरूपेणाव्यङ्गेनाहीनाङ्गेन कुलशीलाचारवता धुर्येणाधिष्ठितान्, द्वाभ्यां द्वाभ्यां ऋग्यजुःसामाथर्ववेदक्रमेणैकैकवेदपारगाभ्यां ऋत्विग्भ्यामध्यासिताग्निकुण्डचतुष्टयान्, चतुर्भिर्द्वारजापिभिः कृतरक्षान्, शय्यादर्पणच्छत्रकरपत्रिकादिसकलगृहोपकरणपरिपूर्णान्, राजभवनाङ्गणविरचितात्, अगण्यपुण्यद्रविणभाण्डागारान्, चण्डकलिकालचौरनिग्रहगृहान्, सुकृतलक्ष्मीसमुद्वहनमण्डपान्, दर्शनमात्रेण सकलकलुषप्रक्षालनक्षमान्, दानमण्डपान् विवेश ।

तत्र च संकल्पपूर्वकं विहितनियमसहितोपवासः पूजिताधिदेवप्रत्यधिदेवतः गीतवाद्यतूर्यघोषप्रवर्तनेन कृतजागरः तद्दिनमनयत् । प्रातःसमये कृततीर्थजलस्नानो विहितनित्याह्निकः कलितासितवसनमाल्यानुलेपनाभरणो यथावदुत्तममात्रया घटितान्यपरिमितान्नगोभूमिदानोपबृंहितानि षोडशमहादानानि ददौ ।

1 -चिन्तकैः MP.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ महादेवचरणाराधनविधिवर्णनम् ]

ततस्तनयलाभकामोऽनुकूलवर्तिन्या महादेव्या सह सर्वकामदस्य महादेवस्य चरणाराधनविधिमारब्धवान् । प्रतिदिवसं च पञ्चामृतपरिपूर्णसौवर्णकलशसहस्रैरजस्रमभिषेकं भवस्य कारयामास । अपारकर्पूरसुगन्धिचन्दनसान्द्रकुङ्कुमद्रवैर्विलेपनमकारयत् । विविधपरिमलबहलकुसुमैर्विचित्रकनककमलैर्विहितधूपदीपनैवेद्यगीतवाद्यैश्च पूजामकरोत् ।

## [ पुत्रप्राप्तिवरप्राप्तिः ]

अनेनैव क्रमेण कतिपयस्मिन्ननेहसि प्रयाते कदाचिद्रजनीविरामसमये कुण्डलितहुतवहज्वालाकपिलजटाकलापं भूतिविभूषितधवलगात्रमासूत्रितमुञ्जमयमेखलावल्कलकौपीनं स्कन्धनिहितभूतिभरिताधारविराजितकक्षं करकलितवेणुरुद्राङ्कुशं स्वप्ने तपस्विनमालुलोके । ततोऽसौ कृतप्रणामः सान्द्रसंमदोत्फुल्लमानसस्तेन तपस्विनेत्थमभिहितः—

'राजन् पर्याप्तमेतेन तव तपसा कतिपयैरेव वासरैस्तनयलाभो भविष्यति । किन्तु नितान्तभूरिद्रविणदानमदगर्वितेन परिगृहीतराजसभावान्तकरणेन त्वया यथाराधनं भगवतो भवस्य व्यधायि तथाविध एव रजस्तमोधिकस्तवात्मजो भावि' इत्यभिधाय तिरोदधे ।

ततः सहसैव प्रबुद्धो मुधा ममायं परिश्रमः समजनीति पुनरपि निरन्तरां चिन्तासन्ततिमुवाह । समाहूय च सहधर्मचारिणीमेवमूचे—

## [ दुष्पुत्रप्राप्तिसन्तापः ]

'प्रिये दुरतिक्रमः खलु पुराकृतानां दुष्कर्मणां विपाकः । यतो ममाजन्मसहजसत्त्वप्रधानचित्तवृत्तेरप्यभीष्टापत्यलाभार्थमिष्टदेवताराधनप्रवृत्तस्य भूयसा राजस एव बलाद् बभूव भावः । अद्य किल स्वप्नविधौ 'राजसभाववृत्तेर्भवतः पुत्रोऽपि राजस एव भविता' इति भर्गेणाहमभिहितः । अत एव निरतिशयविशादावेशवशीकृताशयो वर्ते ।

'यस्माद्वरं दुष्पुत्रादपुत्रता । दुर्विनीतः पुनः पुत्रः सन्तापहेतुरेव पित्रोरिहलोके परत्र च । अतिवेगो हि नदीपूर इव कुलकूलङ्कषः संपद्यते । तीक्ष्णवृत्तिर्हि कुठार इव दूरप्रवृद्धवंशयशःशाखाः खण्डयति । रजोबहुलो हि प्रभञ्जन इव सर्वजनानां दृशः खेदयति । अविमुक्तजडवृत्तिर्हि पङ्क इव पदं कलङ्कयति । मदोद्धतो हि द्विरद इव निरङ्कुशः सञ्चरति । कुटिलगतिर्हि सर्प इव सर्वेषां भयमुपजनयति । दुष्टचित्तो हि शूकल इव न मार्गे चलति ।

## [ सत्पुत्रप्राप्तिप्रयत्नः ]

'तदलमधुना निरन्तरदुःखहेतुभूतया परिचिन्तया । तत्पुनरपि राज्यभारोद्धरणधीर-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भुजस्तम्भमम्भोनिधिवीचिवलयितवसुन्धराधिपत्यसमुचितगुणमक्षीणोदारसत्त्वमप्रतिमप्रतापमपरिमितयशःपयोराशिमनन्यसामान्यमात्मजमासादयितुं महितमहिमानं श्रीपर्वतं गत्वा सहजसत्त्वमयवृत्तिरनन्यचित्तोऽभिलषितफलदायिनं मल्लिकार्जुनत्रिलोचनमाराधयितुममात्यनिहितराज्यचिन्ताभारः प्रस्थास्ये । स्वल्पेनैव च कालेन लब्धहरप्रसादस्त्वामागत्य देवि सन्तोषयिष्यामि ' इत्यभिदधे ।

## [ श्रीपर्वताय प्रस्थानम् ]

ततः परिपूजितकुलदैवत[ः]स्थूलविमलमुक्ताफलाक्षतविरचिते मध्यस्थापितधवलदुकूलाच्छादितरुचिरकाञ्चनपीठे पुरोनिहितसरससहकारपल्लवालङ्कृतमुखकनत्कनकमयमङ्गलकलशे सुरुचिररत्नखचितरजतत्रिपदीसमारोपितविस्तृतकाञ्चनभाजननिवेशितहरितदूर्वाङ्कुराक्षतदधिमातुलिङ्गफलकमनीये चतुष्के गणकगणसाधितशुभमुहूर्त्ते मङ्गलगीततूर्यवेदघोषैर्वर्द्धितमहोत्साहः समुपविष्टो धर्मपत्न्या महादेव्या पुरोधसा च ललाटघटितदधितिलकशिरोनिहितदूर्वाङ्कुरसहिताक्षतः, ब्राह्मणोदीर्यमाणमन्त्राशीर्वादः, पुण्यपाठकप्रकीर्तितपटुसाधुवादः, दक्षिणबाहुपरिस्फुरणसूचितनिरतिशयाभ्युदयस्ततः समुत्थाय तदुपयुक्तपरिमितपरिवारः, परिगृहीततदुचितविविधोपकरणसंभारः, कतिपयकरिकलभकरेणुसुखगमनवरतुरगचतुरगतिनिरताश्वतरसुखासनानुगतोऽपि राजाधिराजमधिरुह्य नृपः प्रतस्थे ।

## [ श्रीशैलवर्णनम् ]

कतिपयैरेव परिमितप्रयाणकैरध्वानमुल्लङ्घ्य योजनत्रयान्तरव्यवस्थितः, पूर्वदिग्भागवर्तिनो मार्त्तण्डमण्डलस्य व्यवहिततया किञ्चिदूनयामद्वयसमये सप्तयोजनान्तरितस्य पाश्चात्यदिग्भागात् पूर्वाभिमुखमागच्छतः कटकस्य घटितनिबिडच्छायतया छत्राणां भूषणमात्रतामासूत्रयन्तम्, गगनाङ्गणप्रयाणोद्यतदिवसनाथरथचक्रचङ्क्रमणसंघर्षणदूरसमुच्छलितबहलधातुधूलीपटलपरिघटितारुणरागपिहितान्तरिक्षतया मध्यन्दिनसमयेऽप्युदयकालसन्देहमुत्पादयन्तम्, दूरोन्नतशिखरपरम्परान्तरालैः विनयेनेव वितीर्णाम्बरमणिरथसञ्चरणोचितसरणिम्, उत्तुङ्गशृङ्गततिसङ्गतनिर्झराकारोपलक्ष्यमाणगगनगङ्गाप्रवाहम्, समुन्नतशिखरस्थितवनस्पतितुङ्गशाखाग्रलग्नकुसुमपरंपरायमानतारकानिकरम्, निजोत्तुङ्गतानुरूपपरिणाहतिरोहितदिगन्तरम्, वासरविरामसमयप्रज्वलदुज्ज्वलौषधीविविधकाञ्चनद्रवरुचिरमरीचिनिचयखचितमूर्त्तितया कनकगिरिमिव प्रतिभासमानम्, कटकनिकटपर्यटनपटुभिरञ्जनपुञ्जनीलैरतिगम्भीरगर्जितैः शीकरासारपरिप्लावितगण्डशैलैर्घनाघनैश्च घनाघनैश्च विराजमानम्, शशधरकरविशदशरत्कालबलाहकनिवहधवलदुकूलपरिवेष्टनमण्डितनितम्बभागम्, उपान्तसञ्चरत्परिणतदन्तिदन्तावघा-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तविदारितकनकशिलातलविनिर्गतविविधरत्नजातसंजातसजातरूपोपकण्ठाभरणशोभम् , सरसचन्दनतिलकराजिविराजितोत्तुङ्गशिरःसङ्गतविशालशिलाभालतलम् , अतिगम्भीरदरीमुखसमुद्गतोन्नतपृथुतरपरिपाकशिलीमुखमुखविद्धवंशशुषिरप्रविष्टमारुतोदीरितमधुरतारध्वनिभिस्तान[1]-प्रदायिनमिव गातुमुद्यतानां गन्धर्वपुरन्ध्रीणाम् , सजलजलधरगम्भीरधीरध्वानानुकारिसमदकरटिपटुकण्ठगर्जितप्रवर्त्तितशिखण्डिमण्डलताण्डवाडम्बरम् , छायातरुतलनिषण्णकिन्नरमिथुनोद्गीतस्निग्धकलरवाकर्णनमोहितशिथिलकर्णार्द्धजग्धमुखस्थिततदवस्थ[2]दूर्वाङ्कुरश्लथशरीरोत्थितरोमराजिसङ्कुचितगलकन्दलहरिणगणनिमीललोचनाञ्चलगलदानन्दवाष्पजलनीहाराप्यायितशाद्वलस्थलम् ।

## [ विविधवन्यपशुवर्णनम् ]

कुत्रचित् समीपगतसमुन्नतघनघटाविलोकनकुपितसाटोपविस्फारितकेसरसटाजटालकण्ठकण्ठी[ रव ? ]रवो[3]चण्डगुञ्जारवश्रवणभयसमुन्नमितशिरस्कोद्घाटितकर्णकरास्फालितधरातलोदञ्चितवालदण्डसङ्कुचितशरीरनिवृतनयनाननकृतपीट्कारवशासनाथवारणयूथम् ' कुत्रचित्प्रकुपितमृगपतिनखरप्रखर[4]प्रहारविदारितसमदकुम्भिकुम्भस्थलोच्छलितरुधिरारुणस्थूलमुक्ताफलोपजनिततत्क्षणाकालेन्द्रगोपभ्रमम् ,

कुत्रचित् सरसपचेलिमदाडिमबीजबुद्धिमुखनिहितनिर्झरप्रपातविगलितमरकतस्थलीस्थितमाणिक्यचर्वणभग्नदन्तनिष्ठ्यूतकवलसहितदन्तकरकलितकपोलखिद्यमानवानरम् । '

कुत्रचिदुत्तुङ्गचन्दनमहीरुहारोहणसमयसमालम्बितस्कन्धलग्नवल्लीसदृशाकारकालोरगग्रीवाग्रहणसंजातवेपथुप्रसारितकरपीडितमुष्टिमोक्षणभीततिर्यग्वदनमुहुर्मुहुरपाङ्गनिरीक्षणरतमूर्द्धसंलीनकर्णकेशशरीरान्दोलनवञ्चिततत्पुच्छप्रहारकृतकिलकिलरुतोद्घाटितदशनभयोत्सृष्ट[5]विण्मूत्रकान्दिशीकचटुलमर्कटम् ,

कुत्रचिदतिदुरारोहमहाविसङ्कटविटङ्कतटघटितविचित्रमधुच्छत्रातिभरपरिस्रवन्मधुरमधुविन्दुसन्दोहसमास्वादनलम्पटतोद्घाटितोन्नमितमुखाप्रविष्टशिलातलपतितक्षौद्ररसरसिकलेलिहानलोलगोलाङ्गूलकुलम् ,

कुत्रचिदतिबहलबालातपनिषेवणनिरततुषारशीतकातरोन्नततरतरुशिखरोत्तुङ्गतमशृङ्गाग्रशिलातलारूढपार्श्वकपणप्रवृत्तनिमीलितनयनशाखामृगम् ,

1 ध्वनिभिः स्थान- MS. 2 -तदधस्थं- MS. 3 -कण्ठीररवो- MS. 4 -प्रकर- MS. 5 -भयोत्कृष्ट MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुत्रचिद् वल्मीकविवरविनिहितमुखनिश्वासाकृष्टपिपीलिकापटलनिगलनोद्यतकज्जलपुञ्जसच्छायमहाकायसञ्चरदक्षलक्षम् ,

कुत्रचित् स्वैरविहरमाणहरिणगणमारणप्रवणमृगविलोकनक्षणस्थगितशरीरलाङ्गूलाग्रवलनहतधरणितलचरणप्रवृत्तैणकवलनप्रधावितातिजवनहठनिपातितनखकुलिशपाटितपार्श्वदशनदष्टकण्ठाध्मातजठरकृष्णसारशृङ्गाघातवञ्चनचतुरक्रोधाघ्रातचित्रव्याघ्रम् ,

कुत्रचिदतिनिष्ठुरप्रकोष्ठतीक्ष्णनखालङ्कृतविशालकरतलचपेटापाटितव्यापादितगलकन्दललम्बमानकृष्णचामरानुकारिकेशरनीलरोहिताधिष्ठितपृष्ठगुहागृहाभिमुखप्रचलितदीर्घकृष्णरेखापङ्क्तिमण्डितदेहमहाप्रचण्डपुण्डरीकम् ,

कुत्रचित्सरोवरप्रविष्टसरलहृस्वप्रमाणस्थूलवालालङ्कृताग्रपुच्छविपुलजवननमितमध्यविशालवक्षःस्थलपीवरस्कन्धोदीर्णकर्णोन्नमितशिरस्कं बहुपक्ष्मराजितवञ्जुलनिर्यासपिङ्गललोचनविषमवनमहिषसुतीक्ष्णविषाणकोटिताड्यमानतटपङ्कपङ्कजोदकम् ,

कुत्रचिदभिनवाशोककिसलयच्छायगवाकारकायनासाविवरसततलेहनप्रवृत्तजिह्वाग्रप्रवित्र[ । ]शृङ्गगवयगणम् ,

कुत्रचित्करेणुसदृशचरणतलत्रिखण्डभिक्तकृत्तकवचमण्डितगात्रलघुलाङ्गूलदण्डनासावंशप्ररूढैकशृङ्गकर्कशस्पर्शशरीरपितृतर्पणोपयुक्तपिशित[1]नड्वलस्थलसंचारिखड्गमृगम् ,

कुत्रचित्कररहितकरिकलभसमानदेहोर्द्धस्थूलदण्डकेशोच्छ्रितपुच्छपार्श्वपिप्पलपर्णसदृशकर्णारिष्टफलकान्तलोचनसितागस्तिकलिकासंकाशकुटिलदंष्ट्राभासुरभीषणाननदाढासंकर्षणसृक्कसंजातडिण्डीर[2]पिण्डनासाग्रविदारितधरासमदशूकरी[3]यूथानुसरणप्रवृत्तसमदमहावराहम् ,

कुत्रचिदतिगहनगुल्मवनप्रदेशविहरणरसिकैः प्रावरणीकृतसुवृत्तस्थूलमुक्ताफलजालकैरिवोत्तुङ्गबहुशाखशृङ्गभारभुग्नकन्धरैः खुराग्रखनितक्षितितलैः शिरःशृङ्गकोटिघृष्टनिबिडमाधवीलताखण्डै[4]रुच्छ्रित[5]पुच्छैः स्वच्छसितोदरैः श्यामधमनिभिर्धवलकण्ठैररुणापाङ्गनयनैः सारङ्गसङ्घैरावृतम् ,

कुत्रचित् परिस्फुरदनणुतृणज्योतिरुद्द्योतविप्रलब्धोषर्बुधबुद्धिप्रधावितपापर्द्धिलब्धमांसपाकलालसव्याधमुग्धवधूसमूहम् ,

---

1 पिसित- MS. 2 दिण्डीर- MS. 3 समदः सूकरी- MS. 4 लताषण्डै- MS. 5 -द्धृ- or च्छृ MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ पुलिन्दसुन्दरीवर्णनम् ]

कुत्रचित्परिकालितमनोहरतराशोकपल्लवविलासतरुणतमालपलाशनीलांशुकपरिधानाभिः प्रियनिहतकरिकुम्भमुक्ताफलशबलगुञ्जाफलहारभूषितकण्ठसङ्कटपयोधरमध्याभिः उज्ज्वलसुवृत्तोन्नतकठिनकुचतटाभिः मुष्टिग्राह्योदरीभिः, इन्दीवरदलदीर्घलोचनाभिः वदनारविन्दपरिमललोभनिषण्णालिकुलसदृशालकशोभितललाटतटाभिः; अतिकृष्णमृदुदीर्घकिञ्चिदाबद्धमुक्तकेशकलापाभिः मयूरपिच्छावतंसाभिः अरुणोत्पलकर्णपूराभिः, हरिद्राङ्गरागशोभितश्यामलशरीरकान्तिभिः, अतिललितकोमलबाहुलताभिः, करतलविधृतदन्तिदन्तमुसलैः शिलातलोलूखले वेणुतण्डुलकण्डनमारचयन्तीभिस्तदनुसारेण स्वभाषारचितमधुरगीतानि गायन्तीभिः पुलिन्दसुन्दरीभिरलङ्कृतलतागृहाङ्गणम् ।

## [ पुलिन्दवृन्दवर्णनम् ]

कुत्रचिद् व्यायतवैयाघ्रकृत्तिविरचितवसनैराबद्धपिण्डितजङ्घादण्डैः स्फुटितचरणाङ्गुष्ठैर्लघुतुन्दिलोदरैरर्जुनशाखिशाखावष्टम्भितसिरीप[ ! ]प्रचण्डकोदण्डैर्मयूरारुणपिच्छपत्रित(पुच्छा)[1]ग्रभागनिवेशिततीक्ष्णखदिरघटितभल्लकैर्दक्षिणकरेण विधृत्य वामकराङ्गुलिं करभनिविडपीडनेन तिर्यङ् निरीक्षणपुरःसरं शरवृष्टिंकुर्वद्भिः पुलिन्दवृन्दैरुपरुद्धसविधम्,

## [ अन्यवनेचरवर्णनम् ]

कुत्रचित्प्रियाकोपभीतेन वक्षःस्थलनखक्षतकारणदर्शनार्थमानीतस्वशिलीमुखविदारितमहाव्याघ्रेण शबरवीरेण निषेव्यमाणैकदेशम्, कुत्रचिदङ्कपर्यङ्कपरिसुप्तरतिखिन्नशबरीमुखकमलनिश्वासपरिमललोभभ्रमद्भ्रमरमण्डलनिवारणार्थमतिमृदुलशय्याकदलकिसलयव्यजनेन बीजयद्भिर्व्याधवर्गैरनर्गलव्याप्तपर्यन्तम्, कुत्रचिद्दयितावितीर्यमाणपत्रांशुकनिर्माणसमये कङ्केलिपल्लवभ्रमसमाकृष्टकरकिसलयैः सहचरीविहस्यमानैर्भिल्लतरुणैरलङ्कृतमेखलम्, कुत्रचिदपरिज्ञातोपयुक्ताद्भुतशक्तिदिव्यकन्दमूलफलैर्वलीपलितवर्जितैर्बहुकालजीविभिः परिपुष्टदृढशरीरैरतुलबलैः शीतातपवर्षसहैर्वनेचरैः सेवितसन्निकर्षम्,

कैलासशैलमिव नीलकण्ठगणोपेतम्, हिमवन्महीधरमिव पञ्चाननस्थितिसमुचितया मनोहरगुहया दुर्गया बाणभुवा विख्यातम्, मेरुगिरिमिव काञ्चनारोचितनिर्झरैरुपशोभितम्, उदयाद्रिमिव बहुशोभानुगतोदयम्, मन्दराचलमिव रत्नाकरमध्योल्लासितसंपदम्, महेन्द्राचल- 52
मिव भृगुसंभवप्रभावयुक्तम्, विन्ध्यधराधरमिवातिपवित्रसोमोद्भवम्,

---

1 -पत्रा- or -मध्या- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किं बहुना, विपुलं सुपार्श्वं शृङ्गवन्तं सत्रिकूटं माल्यवन्तं गोवर्द्धनं हेमकूटं नीलं सुवेलमित्थं सकलभूभृत्प्राग्भारैरिव संभूय निर्मिताभोगमतिविस्तीर्णकटकमनन्यसामान्यसंपदमुपरिस्थितेन भास्वता शिखरगतविततरुचिररत्नप्रभापरिवेषेण रत्नातपत्रेणेव विराजमानमुभयतश्चामरग्राहिणीभिरिव समीरणान्दोलितविकसितकाशकुशस्तोमचामराभिर्विपिनलक्ष्मीभिरुपवीज्यमानं महान्तं महीभृतां भूषणं भुवो निखिलनरेन्द्रवृन्दसेव्यमानपादमात्मसमानं श्रीशैलमाससाद ।

## [ तुङ्गभद्रास्नानम् ]

तस्य च पश्चिमद्वारे अलंपुरतीर्थे सितसिकतिलविपुलपुलिनायां ब्रह्मकुमारपरितवालुकादेवकुलकपरिशोभितवारिसन्निहिततीरायां, तरलतरङ्गमालान्दोलितमन्दारकुसुमानुगीयमानदिव्याङ्गनावगाहनलीलायां, प्रवाह्यमाननैवेद्यपितृपिण्डसमासादनलोभायातबृहत्कायपोताधाननिरुद्ध्यमानतीव्रवेगायाम्, अन्तर्जलनिविष्टब्राह्मणजनजप्यमानाघमर्षणानुगुणनिर्गच्छदच्छमुक्ताफलानुकारिबुद्बुदपरंपरायाम्, उभयकूलशिलातलासीनयतिजनपरिशोष्यमाणकाषायवसनसंपाद्यमानगैरिकमयतटायामभिलषितफलसन्ततिप्रदायां तुङ्गभद्रायां स्नात्वा भगवन्तं चराचरगुरुं ब्रह्मेश्वरं परमभक्त्या परिपूज्य तस्या एव वेदपादोद्भवायाः पुण्यसरितस्तटे कटकं समाश्वास्य, कतिपयाप्तपरिवारपरिवृतः सङ्गमे निवृत्तिसङ्गमे सोमशिलायां च स्नानं विधाय देवर्षिपितृ[न्] सन्तर्प्य,

## [ श्रीपर्वतशिखरारोहणम् ]

श्रीपर्वतस्य कटकमारोहं[1]स्तस्य महामहीभृतः प्रकटितकरटिसमूहां खड्गिभिरावृतां रुचिरबाणासनां राजधानीमिव मेखलां, रुचिररत्नखचितकनकशिलाभित्तीनि मन्दिराणीव कन्दराणि अन्तःस्थितपातालविलासिनीसमूहानि गणिकागृहाणीव विवराणि, जीवधनानीव वनमहिषीगवयगोकुलानि, विविधसमृद्धीनि कल्याणकोशभवनानीव निधानस्थानानि, धारागृहाणीव सनिर्झरप्रपातानि कुञ्जानि, तत्र तत्र विहितवसतिं ब्रह्मपुरीसमाजमिव मुनिजनं, सर्वतः संचरतः पौरलोकानिव सुरसिद्धसाधकानमन्यत ।

अन्यच्च क्वचन चरणकमलललितालक्तकरसोद्भिन्नव्यक्तमुद्रानिवेदितसुरसीमन्तिनीविहरणविलासानि चन्द्रकान्तशिलातलानि, क्वचन तापोत्तीर्णसुवर्णवर्णकर्णिकारकुसुमास्तरणविन्यस्तवासन्तिकाकुरबकबकुलविचकिलप्रसवोत्तरच्छदावेद्यमानदिव्याङ्गनानङ्गक्रीडासंभोगलताभवनानि, क्वचन विजृम्भमाणगम्भीरसंमुखायातपातालकन्यकावाद्यमानमङ्गलतूर्यनिर्घोषानुगीयमा-

1 -ह- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नान्तःप्रविष्टसिद्धजनाभीष्टसिद्धीनि विवरद्वारकाणि, क्वचन हस्तविन्यस्तमस्तकसाधकजनान्विष्यमाणवलीपलितरोगदौर्गत्यमृत्युभयापहारिवलतेजोवीर्यस्थिरतारुण्यचिरजीवनकारिरसरसायनसाधनोपयुक्तश्वेतदर्भपीतागस्तिरक्तवज्रद्रुमकृष्णचित्रकाण्यन्यत्रालभ्यानि दिव्यौषधिक्षेत्राणि, क्वचनादृश्यतिलकाञ्जनपटगगनगमनकरणक्षमपादलेपपादुकाखड्गस्पर्शवैविचिन्तामणियोगदण्डगुटिकादिविविधाश्चर्यकरसिद्धिसाधनसमुद्यताराधकाराध्यमानदैवतानि देवतायतनानि । क्वचन शैलोदकस्पर्शकर्त्तरिच्छायाकर्त्तरीसंजीवनतैलोपपदसलिलपूर्णानि कुण्डानि, क्वचन शृङ्गाररसमृगतृष्णिकाविप्रलोभ्यमानकामुकमृगाभिश्छायाङ्गनाभिरुपशोभमानानि सानूनि, क्वचन कुचकलशवहलकुङ्कुमाङ्गरागाभिव्यज्यमानखचरकामिनीजनावगाहनविलासान् निर्झरप्रवाहान् ।

## [ आश्रमपदवर्णनम् ]

क्वचन परस्परप्रशान्तवैरगजसिंहाहिनकुलश्येनकपोतव्याघ्रमृगशुकमार्जारमयूरबहुरूपकाकोलूकसहवासप्रदर्शितसौहृदानि पुञ्जीकृतनीवारव्रजविराजमानानि विस्तीर्णपर्णपटितान्युटजाङ्गणानि ।

परित्यक्तविषयसुखान्यप्यास्वाद्यमानश्रीफलानि, कलत्रसंसर्गरहितान्यपि प्रवर्द्धमानवंशानि, दूरीकृतसहचराण्यपि मित्रोदयालोकननिरतानि, बहुजनविधीयमानविशालतरपवित्रपलाशपत्रपात्राणि, प्रज्वलज्ज्वलनज्वालावलीपरिशोध्यमानाग्निशौचकौपीनानि, समृद्धसामिधेनीनिवहसमेधितवात्यानुकारिप्रदक्षिणशिखिशिखाकलापहो[ म ]धूमस्तोमश्यामलीकृततमालमालायमानविविधानोकहसमूहानि, उपाध्यायाध्याप्यमानमुनिकुमारकनिर्भराभ्यस्यमानसामस्वरश्रवणसुखपरवशीभूतनिश्चलकरकर्णबालधिसध्यानसामजसमजानि, अध्वरारम्भमथ्यमानारणिविनिःसरद्बहलानलस्फुलिङ्गकवलनलोभा[ द् ]धावमानाङ्गारभक्षकपक्षिपवनसमेध्यमानवैश्वदेवीयवैश्वानराणि, निर्वर्त्तितानुष्ठानभिक्षाप्रविष्टनैष्ठिकजनकराधिष्ठितपर्णपात्रनिक्षिप्तामृतोपमफलभरतरुखण्ड[1]मण्डितानि, अम्बाविलोकनसमुत्सुकवत्ससङ्घवेङ्कारसंश्रवणप्रवृत्तप्रस्नवक्षरत्क्षीरस्वस्थानाभिमुखधावमानवंभारवमुखरमुखकपिलहोमधेनूनि, पर्यटच्छुश्रूपापटुवटुकुठारिकाखण्ड्यमानखदिरखरमञ्जरीपलाशादिकुशकाण्डानि, निवारितोद्दामपापप्रचारधर्मनरपतिसाम्राज्यविजृम्भमाणविजयस्तम्भानुरूपविश्रमयूपध्वजोपशोभितसमीपानि;

निवारितपापप्रवेशानि सुकृतदुर्गाणीव, प्रवर्त्तमाननिरन्तरशुभव्यवहाराणि कृतयुगनगराणीव, प्रकटितपरमैश्वर्यसंपत्तीनि मोक्षलक्ष्मीनिधानानीव, तपोलक्ष्मीक्रीडावनानीव,

---

1 -षण्ड- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्रोधस्य निग्रहस्थानानीव, मदस्य परिभवभवनानीव, रागस्योच्चाटनमण्डलानीव, द्वेषेन्धनदहनकुण्डानीव, धर्मस्य वशीकरणानीव, उपशमस्योत्पत्तिमन्दिरा[1]णीव, पवित्रताप्ररोहनिष्पत्तिक्षेत्राणीव, अगण्यपुण्यप्रवृद्धिकेदाराणीव;

असङ्ख्यान्यपि समित्सङ्गतानि, प्रवृद्धमदनान्य[प्य]पगतकामानि, अनङ्गीकृतकलीन्यपि बहुतरकन्दलानि, मातङ्गसङ्गतान्यपि द्विजवरसेवितानि, अनुग्राण्यपि नीलकण्ठाध्यासितानि, सदारयुक्तान्यपि विप्रयुक्तानि, मुमुक्षुसेवितान्यपि विटपालिसङ्गतानि, प्राज्ञजनसेव्यमानान्यपि जडबहुलानि, निषिद्धमार्गाण्यपि सकृष्णमार्गाणि, सकलशुभनिदानान्यपि परिदृष्टधूमकेतूनि;

युद्धोद्यतानीव सखङ्गधेनूनि, भारतरणानीव विलसदर्जुनानि, कौरवसैन्यानीव सकृपजनानि, अश्वत्थामचरित्राणीव द्रोणोल्लासितानि, दुर्योधनविजयचरितानीव सशकुनिविलसितानि, पाण्डवगोत्राणीव नकुलसहितानि, मैथिलीनाथबलानीव विलसच्छाखा[2]मृगाणि, धूर्जटिजटापटलानीव बहुकपिलताध्यासितानि, आश्रमपदानि ददर्श ।

यत्र च तीव्रता तपःसु, तीक्ष्णता कण्टकेषु, रागिता काषायचीवरेषु, वक्रता किंशुककुसुमेषु, चपलता होमाग्निशिखासु, मदविकारो वनगजेषु, बहुतरलतायोगस्तरुषु, स्त्रोयोगो वल्मीकेषु, अवघातो नीवारेषु, बन्धनं मुञ्जमेखलासु, निरोधः प्राणायामेषु, सञ्चयः पुण्येषु, पीडनं प्रक्षालितकौपीनेषु, खण्डनमिध्मेषु, युद्धश्रवणं महाभारतरामायणेषु, मण्डनं वेदिषु, अवज्ञा विषयेषु, द्वेषः पापेषु, रतिरनुष्ठानेषु, अधःपतनं तरुफलेषु विलोक्यते ।

## [ आश्रममुनिवर्णनम् ]

यत्र च केचित् भस्मकोपलान्तरालसमाकृष्टहरहसितधवलभसितोद्धूलिततनवः, कषाययोगपट्टकगाढनिबद्धजटामण्डलाः, ध्यानधारणादिसमृद्धिसमिद्धसमाधिबन्धबन्धुरमतयः, बाणलिङ्गस्नपनपरिपूजननिबद्धसहजरतयः, दुस्तरसंसारसागरसमुत्तरणसेतुभूतशैवागमशास्त्रोपदेशविशारदाः, शरदाम्बुधरविशदतरयशःप्राग्भारविभूषितभुवनतलाः, कलिकालकलुषप्रक्षालनाद्भुततमतपःप्रभावाविर्भावभूमयो, मायाविकारविरहितमानसवृत्तयः, ज्ञानानलदह्यमानदुष्कर्मेन्धनभस्मसमानोद्धूलनभूतयः, निरन्तरप्रवर्धमानतपोग्निधूमशिखानुकारिजटाकलापा, यज्ञोपवीतमिषतोव[!]भ्रान्त्या वासुकिनेव निषेवितकण्ठाः, मोक्षलक्ष्मीमण्डनमौक्तिकैकावलीसुललितरूपाक्षसूत्रपवित्रितकरतलाः, केचिदसमतपःप्रभावविनिःसारितान्तरसंसारानुरागसदृशसमुपलक्ष्यमाण-

1 -मंदरा- MS. 2 -सत्शा- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कापायवसनधारिणः, कृष्णं कल्मषमिव केशकलापमपनयन्तः, कलिकालकौलेयकतर्जनार्थमिव दण्डमुद्वहन्तः, असमपरमब्रह्मानन्दामृतसततास्वादनाप्यायननिराकृतसंसारविषतृष्णा यतयः; केचिदापाढिनः, परिहितकृष्णाजिनभ्राजमानवपुषः, मुण्डितमुण्डाश्चूडालाः, सितयज्ञोपवीताः, कुशपवित्रपवित्रितपाणयः, कटिपरिवेष्टितपावनमुञ्जमेखलावल्कलकौपीनधारिणो ब्रह्मचारिणश्च प्रतिवसन्ति ।

तेषु च कांश्चित्पादपानिव जलाहारान्, बालकानिव पयःपायिनः, पन्नगानिव पवनाहारान्, मृगानिव फलमूलकन्दपत्रचारिणः, कफपीडितानिव धूम्रपान्, वनव्रातानिव जपारक्तान्, न्यग्रोधानिव जटाधारिणः, मयूरानिव शिखाभृतः, कातरानिव अनङ्गरोचितान्, पार्थिवानिव क्षमाप्रसाधकान्, शक्रचापानिव निर्वाणसन्धानरुचीन्, बाणानिव प्राप्तमोक्षान्, अर्थिन इव नवं धनं प्राप्य सुखीभवतः, महाकवीनिव समाधिबन्धरसिकान्, तार्क्ष्यपक्षानिव पुरुषोत्तमाधिष्ठितान्, अरण्यप्रदेशानिव कलिताक्षमालान्, वरगिरिस्थितानपि मौनिनः, क्षमाभृतोऽप्यगह्वरान्, प्रसिद्धब्रह्मचर्यानपि कृतमोहनाशान्, द्विजमुख्यानप्यविवरान्, अदम्भस्थितीनपि सदम्भःस्थितीन्[1], परित्यक्तविषयानपि कान्तारोचितवसतीन्, अराजसरूपानपि सदाचारयुतान्, परिहृतविकारानपि विहितविकृतीन्, पुण्यनीतिविदोऽप्यनीतीन्, परित्यक्तसकलसुखानप्यास्वादितश्रीफलान्, ब्रह्मचारिणोऽपि सकलत्रवृत्तीन्, दूरीकृतसर्वसङ्गानपि मित्रोदयालोकननिरतान्, वाताशनानप्यभोगिनः, निर्दोषोदयानपि सत्तारकान्, अमन्यूनपि कृतमन्यून्, स्पष्टाषाढानपि ज्येष्ठतया ख्यातान्, वृषगतीनप्यनगानप्यलोकयत् ।

## [ तुङ्गभद्रामहानदीवर्णनम् ]

ततः क्रमेण गच्छन्नद्भुतवस्तुसन्दर्शनजनितसन्तोषो योजनार्धमात्रसंमितां भूमिमतिक्रम्य दुरवरोहदुरारोहलोचनमात्रगोचरविषमसङ्कटोभयतटां, तीव्रतरप्रवाहपाटितपर्वतमध्यां, नारायणकरकलितनन्दकदुरासदविभिद्यमानोद्भटमधुकैटभसंस्मरणकरणप्रवीणां, मेघविच्छेदमालासमानच्छविविशालशिलाकुंजविराजमानविमलाकाशसंकाशनिर्मलजलान्तरालसञ्चारितरलमीनकलितशोभां, विशालपद्मरागशिलातलनिपतत्प्रवाहधारादूरसमुच्छलदच्छातिबहलशीकरतया वैश्वानरमध्यनिधीयमानप्राज्याज्यधारासमुद्भूतधूमस्तोमशोभामुद्वहन्तीं, तत्कालोपनतपुण्यलक्ष्मीसमुद्वहनसमयसमाहन्यमानमङ्गलतूर्यनिर्घोषानुकारिस्फारकल्लोलकोलाहलां, देवर्षिस्वहस्तविन्यस्तनमेरुमन्दारहरिचन्दनपारिजातसन्तानतरुकुसुमपरिपूजितस्थण्डिलमण्डितजलान्तरालवर्तिविस्तीर्णशिलापट्टविराजितमध्यां, प्रतिदिनप्रवर्द्धमानधर्मद्रुमस्य गम्भीरावर्त्तनिभेनालवालमिव

1. सदंभस्थि- MS.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कल्पयन्तीं, पवित्रगाम्भीर्यरामणीयकादिनिःसाधारणगुणकलापसंप्राप्तसकलमहानदीसमूहविजयसमुद्भूतं शशधरकिरणनिकरशुभ्रं यशःप्राग्भारमिव तरलतरतरङ्गपरंपराप्रेर्यमाणफेनपटलच्छलेन दिगन्तराणि नयन्तीं, भगवन्तं जगद्गुरुं मल्लिकार्जुनदेवमाश्रितस्यैकवेणीमिवं श्रीपर्वतमहातपो-[ ध ][1]नस्य,

उन्मज्जज्जलवारणेन्द्ररमणीयकुम्भाभोगशोभया पीवरोन्नतं कुचमण्डलमिव कलयन्तीं, पङ्क्तिव्यवस्थितामुभयतटव्यापिनीं मरालमालां हारलेखामिव धारयन्तीं, तटद्वयस्थितचक्रवाकयुगलानि कर्णावतंसरक्तकमलानीव समुद्वहन्तीं, अन्तर्विलुठनदृश्यमानपाठीनजठरचटुलनयनां, विकसितकनककमलप्रसन्नवदनां, तनुतरतरङ्गितसङ्कटप्रदेशमध्याम्, अतिविलासपुलिनविपुलनितम्बाम्, अतिसरसकोमलमृणालनालसुललितबाहुलतिकां, द्विधाप्रवृत्तप्रविततप्रवाहोरुयुगलां, सारससमूहरचितसरसनिस्वनाम्, अनेककुल्यासखीभिः सङ्गतां, प्रचुरलावण्यस्य वाहिनीनायकस्य कुलपत्नीम्,

आलम्बनयष्टिमिव बहुकालप्रवृद्धस्य धर्मस्य, कृपाणलतिकामिव पापशिरश्छेदनोद्यतस्य पुण्यचक्रवर्तिनः, कबरीमिव विश्वंभरानायिकायाः, बाहामिव श्रीपर्वतपादार्चनकृतमतेः सरित्पतेः, श्रमदण्डिकामिव दक्षिणक्ष्मानर्तक्याः, सारणीमिव सुकृतोद्यानस्य, मदवारिरेखामिव श्रीपर्वतद्विरदस्य, इन्द्रनीलमेखलामिव दक्षिणदिगङ्गनायाः, वनमालामिव श्रीधरणिधरस्य,

दोषाकरप्रभवेति नर्मदां, चरमगामिनीति तापीं, बललाङ्गलाकृष्टेति कालिन्दीं, ऋचीकभयाद्भिन्नेति गोदावरीं, निरन्तरं न दृश्यमूर्तिरिति सरस्वतीं, भुजङ्गभवनगामिनीति गङ्गामप्यतिशयानां,

वाहिनीमप्यपरागसेवितां, निम्नगामपि नदीनसङ्गतां, कुटिलगतिमपि स्वच्छां, जडप्रकृतिमपि सत्त्वाधिकां, गोत्रविदारिणीमपि प्रवृद्धवंशाश्रितां, क्षारोदकसमृद्धामपि स्वादुसलिलां, विषवाहिनीमपि जीवनधारिणीं, वेदोद्भवामपि लोकायतप्रसरां,

कौरववाहिनीमिव धार्तराष्ट्रान्विताम्, अङ्गनामिव सुभगवयःशोभां, विन्ध्याटवीमिव सपुण्डरीकां, कामिनीमिव सुरुचिरसिकतां, ताम्रपर्णीमिव बहुमुक्तानुयातां, करटिदन्तप्रतिमामिव सिंहतुण्डमण्डितां, गोदावरीमिव कुशतर्पणाङ्कितकूलां, मलयाचलतटीमिव घनसारसहितां, नारायणबाहुमिव चारुचक्रां, प्रपापालिकामिव कलसीकरां, पातालतलप्रवाहिनीं भोगवतीं भगवतः श्रीशैलशिखरनिवासिनो मल्लिकार्जुनदेवगङ्गाधरस्योत्तमाङ्गपर्यटनपटुगङ्गामन्वेष्टुं धरणीतलं विभिद्य समुद्गतामितीव कलितपातालगङ्गाभिधानां तुङ्गभद्रामद्राक्षीत् ।

---

1 -तपोवन- ? MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ मल्लिकार्जुनमहादेवदर्शनम् ]

तस्यां स्नात्वा सन्तर्प्य पितृदैवतानि दर्शनमात्रप्रभावाविर्भावितामिलषितफलोदयं, स्पर्शमात्रविसूत्रितसकलकल्मषप्रसरं, सप्तर्षिवृन्दारकवृन्दस्वहस्तविन्यस्तदिव्यकुसुमसमुपजनितपूजासंभारं, विचित्रचतुष्कविरचनाचारुचरणतलव्यक्तालक्तकपादमुद्रामुद्रितप्राङ्गणाभिव्यज्यमानरजनिसेवासमागतगीर्वाणरमणीललितलास्यविलासं, क्षेत्ररामणीयकहृतहृदयेनाराधकजनसमीहितसिद्धिसंसाधनप्रभविष्णुप्रभावविशेषं निरर्गलशक्तिविभवेन भगवता भर्गेण सन्ततमपरित्यक्तसन्निधानं, पृथिवीतलगतसकलतीर्थसार्थेषु स्वस्य तीर्थस्य पार्थिवत्वं समर्थयमानं मल्लिकार्जुनदेवमवलोक्य—

## [ शिवस्तुतिः ]

'जय जय[1] सकलसुरासुरप्रवरमुकुटमणिमरीचिनिचयकुसुमभरपरिपूजितचरणारविन्द, जय विविधवरप्रदानानन्दित[2]भक्तजनवृन्द, जय जय त्वङ्गदुत्तमाङ्गगङ्गापुलिनमरालायमानकुमुदरुचितुषारकरकालिता[3]वतंस, जय दर्पोद्धुरान्धकासुरविहितविध्वंस, जय जय सुरवरसमाजरक्षणदक्षजैत्रैकबाणतीक्ष्णमुखविनिर्यदाशुशुक्षणि[4]क्षणमात्रक्षारीकृतविपक्षदुर्गपुरत्रय, जय सकलजगदाश्रय, जय जय मन्दरमहीधरातिमथितपयोनिधिमध्यसमुद्भूतसुरासुरसंहारकारिकवलितविषमकालकूट, जय वासुकियोगपट्टनियमितजटाजूट, जय जयो[5]द्भटललाटलोचनोग्रविरोचनेन्धनीकृतविषमायुधविग्रह, जय भक्तिविशुद्धमानसजनविहितानुग्रह, प्रसीद भगवान्' इति स्तुतिपदैर्नुत्वा, सपर्यापुरःसरं, भगवन्नसाधारणगुणगणरामणीयकपरिपूर्णसहजसत्त्वमयप्रकृतिम्, अलोकसामान्यविक्रमाक्रान्तसकलभुवनतलं त्वत्प्रसादात्तनयमासादयितुं परिहृतनिखिलविषयासङ्गः परित्यक्तावान्तरव्यासङ्गस्तपस्तप्स्ये इति दक्षमखमथनस्य संमुखमेव सङ्कल्पमकरोत् ॥ छ ॥

## [ तपश्चरणम् ]

ततः प्रभृति प्रतिदिनं पातालगङ्गासलिलपरिपूरितैश्चामीकरचारुकलशैर्भगवन्तं त्रिलोचनं स्नपयाम्बभूव । तदनु हरिचन्दनचन्दनघनसारमार्गद्रवैरनुलिलिम्प । ततो विविधविहितसुगन्धिकुसुमविरचितविचित्रमाल्यपञ्चोपचारसुभगां पूजां चकार । तथा प्रतिभटनरपतिशिरःकिरीटकोटिताडननिरताभ्यामपि स्वभावकोमलाभ्यां चरणाभ्यामेव सन्ततं विरूपाक्षं

---

1 Instead of repeating the word, MS. has "2" above it throughout. 2 -नटित- MS. 3 -करकलाकलिता- MS., but "कला" is deleted. 4 -रासिसुक्षणि- MS. 5 Here MS. has "जय" twice. Is it because of *sandhi?*

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रदक्षिणीचक्रे । सन्ततमनन्तसुखमयोऽपि महासत्त्वतया कन्दमूलजलैरेव प्राणवृत्तिमकल्पयत् । परिगृहीतब्रह्मचर्यनियमः कल्पितशिलातलतल्पः शर्वरीरत्यवाहयत् । किं बहुना, यद्विरोचकमिन्द्रियाणां, यदुत्सारकं विषयाणां, यद्बाधकं तात्कालिकसुखानां, यद्दुष्प्रवेशं विघ्नानां, यद्बन्धनं चित्तवृत्तेः, यन्मोहनं राज्यविलासानां, यद्वशीकरणं श्रेयसां, यत्संसाधकं मनोरथसिद्धीनां, तदनाकर्णितपूर्वमदृष्टचरमतीतगणनापथमतिक्रान्तवर्णनाविषयमन्यैरनुष्ठातुमशक्यमतितीव्रं तपश्चरन्नतिभूयांसमनेहसं निनाय ।

## [ वरप्राप्तिः ]

एवं च क्रमेण परिणमति कियत्यपि काले कदाचिदेकदा निशीथपूजासमये 'राजन्, प्रसन्नोऽस्मि तवाहमतिदुःसहैस्तपोभिः' अल्पीयसैव कालेन सकलमपि तवाभिवाञ्छितं संपत्स्यते । मया हि प्रार्थितः सकलजगद्रक्षणदक्षः क्षीरोदधिशायी पुण्डरीकाक्षः— 'यदुत देव निखिलभुवनाभयदानव्यापारबद्धादर, दुर्दमदानवोन्मूलनपुरःसरं सुराधिपत्यप्रतिष्ठापितपुरन्दर, गोवर्द्धनधरणीधरोद्धरणसमयप्रकटीकृतप्रचण्डदोर्दण्डसार, सकलभुवनानन्दितदशावतार, यादवकुले इव चालुक्यवंशे सकलजगद्रक्षणाय मदनुग्रहार्थं प्रसादबुद्ध्या पुनरवतरणीयमत्र भवता पुरुषोत्तमेन', इति । ततश्च मम प्रसादात् संपन्नमेव तव समीहितमचिरेणैव कालेन कमलावल्लभस्त्वां नन्दनभावेनानन्दयिष्यति । पालयिष्यति च सप्तपारावारमेखलापरिकलितां विश्वम्भराम्' इति लिङ्गोदरादशरीरं वचनमुदगात् ।

## [ कुपुत्रप्राप्तिशापः ]

स च राजा लब्धनिःसाधारणवरोऽपि पुनरपि पुत्रान्तराकाङ्क्षया तथैव तस्थौ । पुनर्गर्भगृहादशरीरां वाचमेवं शुश्राव—'राजन्नतिमथनात् क्षीरादपि कालकूटमुत्पन्नमित्यतिः सर्वत्र गर्हित इति वदन्ति । त्वया चातिकाङ्क्षिणा जगद्विजयिपुत्रलाभेऽप्यतृप्त्या तामसं स्वरूपमाविष्कृतमित्यन्योऽपि विष इव तमोमयस्तनयो भविष्यति । ततस्त्वमिदानीं त्वरया निजपुरीं व्रज' इति ।

## [ स्वराजधानीप्रत्यावर्णनम् ]

स च राजा लब्धवरस्ततः श्रीशैलशिखरादवतीर्य तुङ्गभद्रातटनिकटावासितं शिविरसंनिवेशमादाय कतिपयैरेव प्रयाणकैर्निजां राजधानीं प्राप्तः । तां च स्थानस्थाननिबध्यमानचूतप्रवालवन्दनमालां, प्रतिप्रासादप्राङ्गणोत्सङ्गविधीयमानविविधचतुष्कविरचनां, संमुखाधावत्पोरपुरन्ध्रिजनकरकमलतलोपलक्ष्यमाणमुखनिहितदूर्वाश्वत्थाम्रपल्लवोपशोभिमङ्गलकनककलशां,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रतिगृहोत्तम्भितविचित्रवस्त्रमयमहोत्सवध्वजाम्, उत्तुङ्गसौधवलभीसमधिरूढपुरवराङ्गनाजनकुतूहलोत्तरलनयनविलोक्यमानराजागमनमार्गाम्, अनर्गलवलाहकस्तनितसपत्नविजृंभमाणोत्साहतूर्यकोलाहलां, द्वितीयाचन्द्रमसमिव राजानमवलोकयितुमतिसमुत्सुकसान्द्रप्रमोदसकलजनपदां कल्याणपुरीं विवेश ।

## [ राजभवनगमनम् ]

क्रमेण च सकलजनैः 'जय जय, जीव जीव, संपूर्णमनोरथो वर्द्धस्व' इति विहिताशीर्वादवचनजनितानन्दः, 'जय जय सत्याश्रयकुलतिलक, लोकोत्तरचरितविरचितसकलजनहर्षपुलक, दक्षिणदिगङ्गनावल्लभ, परनरपतिमनोपथदुर्लभ, चन्द्रचूडचरणसमाराधनदक्ष, समरसमापितप्रतिपक्षलक्ष, प्रारब्धवस्तुनिर्वाहणप्रवण, वैरिगृहोत्सङ्गजनितदूर्वाव्रण' इत्यादिस्तुतिपदमुखरमुखैः सूतमागधवन्दिवृन्दैः प्रोत्साह्यमानः, निर्मलदर्पणसहस्रविहिततोरणमालिकालङ्कृतं, सज्जीकृतमाङ्गलिक्यशातकुम्भकुम्भं, विचित्रनेत्रपट्टपटीपरिघटितललितवन्दनमालं, विलोकनोत्सुकघटमानसोत्साहसकललोकसङ्कटं राजद्वारमाससाद ।

ततः संमुखायातसौवस्तिकस्वस्तिवादविधीयमानसंमदः, तत्कालोचितारात्रिकोपयुक्तकाञ्चनस्थालकरसप्रमदान्तःपुरवारवारविलासिनीपरिवृतां, त्वरिततरसंचरणशिञ्जानचरणमञ्जीरशिञ्जितविहितप्रथमाभ्यागतसंभाषणां, वल्लभचरणाम्बुजाग्रविकीर्णसुवर्णकुसुमां, विरचिताञ्जलिमानन्दबाष्पजलबिन्दुभिरर्घमिव वितीर्य प्रणतवतीं महादेवीं करकमलेनोन्नमय्य, गृहीतकरस्तया सह विरचितप्रशस्तमौक्तिकस्वस्तिकमतिचारुचामीकरविविधरत्ननिर्मितसितप्रासादप्रथमभूमिमध्यमध्युवास । तत्र च गृहीतमङ्गलदधिदूर्वाक्षतो विसृज्य सह समागतं परिवारजनं सकलमपि श्रीशैलपातालगङ्गाश्चर्यदर्शनं प[1]रमेश्वरवरप्राप्तिसन्तोषवृत्तान्तं च निवेद्य देवीमतोषयत् । क्रमेण च पुनरपि निजेषु राज्यसुखेष्वरज्यत ।

## [ देवीगर्भधारणम् ]

अथ गतेषु कियत्स्वपि वासरेषु देवी गर्भमधारयत् । प्रतिदिवसमुपचीयमानोदरी च विविधदोहदरसमाविश्चकार ।

## [ दुष्टदोहददर्शनम् ]

तथाहि निरालोकेषु विलसदन्धतमसप्रबन्धेषु गर्भभवनेषु स्थितिमभिललाष । पूर्व- 52
मतिप्रसादपात्रं निरपराधमपि सखीजनं ताडयितुमियेष । स्वयं प्रवर्द्धितानपि लीलावनविलास-

---

1 -दर्शनप- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वृक्षकान् प्राङ्गणार्थं खण्डयितुमाचकाङ्क्ष । लीलाशुकसारिकाहंसपारावतेषु निरादरा काकेभ्योऽन्नं विकीर्य सकौतुकमवैक्षत । उत्तुङ्गानि सौधशिखराणि विहाय सङ्कटेषु भूविवरगृहेष्ववसत् । मदोद्धुरसिन्धुरदन्ताघातविदार्यमाणगजकुक्कुटसूकरनिकरं प्रतिदिनमपश्यत् । सखीजनानां नयने पिधाय वस्त्राञ्चलैरवधीकृतप्रदेशस्पर्शनाक्षमाः नीचोच्चस्थानस्खलनविह्वलास्ता जहास । एवं च तामसप्रकृतिभूयिष्ठं देव्याः दोहदस्वभावमवधार्य हरवितीर्णं प्रथमं सामान्यवरमनुस्मृत्य महाराजो निरुत्साहस्तस्थौ ।

## [ सोमदेवजन्म ]

ततः प्राप्ते दशमे मासि निरवग्रहोग्रग्रहोदये[1], अनुच्चगतसमग्रप्रधानशुभग्रहे, तीव्रतरवहद्धूहलपांशुलप्रभञ्जने, प्रवर्द्धमानदुर्दिनान्धकारनिकरे, अकालघनगर्जनवित्रासितसकलजने दिवसे देवी सुतमसूत ।

## [ सोमदेवकुचेष्टाः ]

राजाप्यवज्ञया तस्य सकलमपि जातकर्मादिसंस्कारकलापमकारयत् । अनन्तरं च तस्य निरर्थकं सोड्देव इति नाम निर्ममे । स च क्रमेण कलिरिव वर्द्धमानः सहचरान् साधूनपि निष्कारणमेव निविडं पीडयामास । सर्वकालं बालकैः सह खर्परकपालिकाकपर्दकैश्चिक्रीड । न कदाचिदपि ब्राह्मणजनं सभक्तिविनयं प्रणनाम । क्रीडया पक्षिणः समारोपितचौरत्ववान् शूलशिखरमारोहयत् । चित्रलिखितानामपि सुरूपाणां पुरुषाणां नखैर्निचकर्त्त नासाम् । एवं च तस्मिन् क्रमेण परिवर्द्धमाने बाले द्वितीयतनयजन्मलाभविलोकनमहोत्सवसमुत्सुकमानसस्य तस्य भूपतेः कियानपि जगाम कालः ॥ छ ॥

## [ देवीद्वितीयगर्भधारणम् ]

अथ शनैः शनैः परिपाकमुपेयुषि निःशेषपुराकृतसुकृतसञ्चये, समुपचीयमानासु द्विजजनानामाशीर्वादपरंपरासु, प्रसभं समाविर्भवति प्रजाभाग्योदयसमये, फलाभिमुखतामनुबभूषति पूर्वसमासादितभवप्रसादपादपे, पुण्यलतेव देवी कुसुमवतीभूय चतुर्थेऽह्नि स्नाता, गतेषु त्रिचतुरेषु वासरेषु, राज्ञा सह रममाणा रमणीयतममुहूर्त्ते समदिवसे गर्भमधत्त ।

## [ गर्भावस्थाः ]

क्रमेण च विनिवृत्तरजःप्रवृत्तेर्गर्भस्थितपुरुषोत्तमावतारसेवासमागतक्षीरोदविशदकान्तिसन्तानैरिवोदरवर्त्तिनोऽर्भकस्य निर्भरप्रगुणगुणगणैरिव शशिखण्डनिर्मलतरैर्विलिप्यमाने

---

1 MS. has निरवग्रग्रहोगतेहोदये or निरवग्रग्रहोग्रहेहोदये ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पाण्डुरता शरीरे समुदजृम्भत । सर्वकालमात्मगौरवेण सदैव कृशतामुपनीतस्य मध्यस्य विवृद्धिमकस्मादेवावलोक्य परिभवेनेव श्याममुखौ कुचकलशौ बभूवतुः । सकललोकदुःस्थता-निराकरणार्थमवतीर्णोऽहमिति निवेदयितुमिव गर्भस्थितो मध्यस्य दारिद्र्यमपाचकार । गर्भाव-तीर्णलक्ष्मीवल्लभहृदयव्यवस्थितभुवनत्रयगौरवेणेव मन्दं मन्दं क्षितितले चचाल । या च निकामधवलसुधाप्रवाहपरिपूरितेव नितान्तप्रसन्नया दृष्ट्या सकलसेवकलोकं व्यलोकयत् । विमलतरकपोलतलप्रतिफलितरुचिररत्नगृहशालभञ्जिकानिभेन कुलदेवतागणैरिव गर्भपरिरक्ष-णार्थमधिष्ठितशरीरा विरेजे । शीतांशुवंशसमुन्नतिहेतोरिहावतीर्णः श्रीवत्सलाञ्छन इति सन्तोषेणेव निजविशदामृतमयकलाकलापैराप्याययितुमिव गर्भं समागतः स्वच्छकुचमण्डल-प्रतिबिम्बितो निशीथिनीषु शुशुभेऽस्याः क्षपावल्लभः । भाण्डागारिकसहस्रहस्तविन्यस्तेषु पुरःसंनिहितेष्वपि विचित्रवस्त्रनिचयेषु निरादरा पीतान्येव वासांसि प्रीत्या परिदधे । बहलतर-परिमलभरसमाहूतचटुलषट्चरणचक्रं लीलाकमलमेव करतले सन्ततं कलयामास । विलासो-द्यानहरितशाद्वलस्थलीषु गोकुलानि चार्यमाणानि व्यलोकयत् । तद्रक्षणपराणां च गोपाल-कुमारकाणां विविधवादचेष्टाः कलितकौतुकरसा निशशाम । कौक्षेयकक्षुरिकाकुन्तकरेषु बहुष्वव्यङ्ककारेषु वल्लभेन निवेद्यमानेषु प्रोद्धतगदायुद्धसमुद्यतेष्वेव कौतुकमुवाह । परचक्रा-क्रमणकुतूहलवती दिग्विजयप्रयाणकरणाय सन्ततमेव निजवल्लभमभ्यर्थयामास । दन्तोत्कीर्णानां विनोदयन्त्रपुत्रकाणामयमेवाधिपतिरिति विहितप्रधानपरिकल्पना कस्यचिदभिषेकपूर्वकं ललाटतटे हाटकपट्टबन्धं विधाय चिक्रीड । महामतङ्गजवाह्यालीविनोदमस्माकं प्रदर्शयेति प्राणनाथं प्रार्थयत । सन्निहितेष्वप्यनल्पेषु विलासतल्पेषु बलादतिसमुन्नतं सन्ततमेव सिंहासनमध्युवास । सन्निधापितेष्वप्यमूल्येषु विमलमुक्ताफलाद्याभरणनिकरेषु निरादरा प्रतिराजकानि विजित्य समानीतेषु विविधरत्नालङ्कारेषु भूषणबुद्धिं बबन्ध । समाकर्ण्यमानेष्वपि रमणीयतमेषु पटुपट-हमुरजादिवाद्येषु सजलजलधरगर्जितानुकारीणि करिणां बृंहितान्येव श्रोत्रसुखावहानि बहुम-न्यत । स्वप्नान्तरेषु कदाचित् शिरीषकुसुमसुकुमारशरीरापि बाहुलतिकाभ्यामेव निःसीमगाम्भी-र्यमम्भोनिधिमुत्तीर्य पारे विहरमाणमात्मानमपश्यत् । कदाचिदुत्तुङ्गदिङ्मातङ्गसङ्गतालानमाला-विशोभितं भवनप्राङ्गणोत्सङ्गं ददर्श । कदाचिदुरगराजशयनमध्यमध्यासीनां निजतनुलतां व्यलोकयत् । कदाचिदुच्चैःश्रवसमारुह्य सप्तद्वीपपरिकलितां विश्वम्भरां बभ्राम ।

## [ कुमारविक्रमादित्यजन्म ]

एवं च क्रमेण संप्राप्ते राजवृद्धिकरे पक्षे, शोभने नक्षत्रे, समग्रेषूच्चस्थानस्थितेषु ग्रहनिवहेषु, शुभसूचके वहति मुहूर्ते, पूर्वपृथ्वीभृदभ्यधिकोदयस्य तेजोनिधेर्जन्ममहोत्सवेन

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विकासमनुभवत्सु करकमलोत्करेषु, सुहृज्जनानां वदननिवहेषु कालिकानिभेन परिणमति तिमिरनिकरे, प्रत्यूषसमये कौशल्यायाः श्रीरामचन्द्र इव देव्याः सकलजनप्रमोदेन सह पवित्रीकृतचालुक्यगोत्रः पुत्रः समुदपद्यत ।

## [ पुत्रजन्मानन्दमहोत्सवः ]

अत्रान्तरे समुल्लसदसमानन्दसन्दोहानां वृन्दानां दिव्यदुन्दुभिनिनादः प्रथमं पृथिवीपतेरनन्यसामान्यतनयोत्पत्तिसन्तोषवार्त्तामकथयत् । अनन्तरमन्तःपुररमणीनां रमणीयतरोत्साहसमुत्सुकमानसानां त्वरातिरेकात्त्वरिततरमग्रतः पतद्भिश्चरणाम्भोजैः संभाव्यमानसंभ्रमाणामतिमुखरतरश्चामीकरनूपुरझाङ्काररवः। पश्चाद्वारविलासयोषितां हर्षभरगद्गदपदमनोहरो वाग्विलासः ।

समाकर्णितनन्दनजन्मजनितसंमदरसविकसितमानसश्च क्षोणीपतिरमृततरङ्गिणीतरङ्गपरंपराभिः परिस्नपितमिव, समुद्यदतिसान्द्रचान्द्रमसमरीचिसञ्चयरसपरिपानाप्यायितमिव, परिमुषितमानुषभावमिव, समासादिताप्रतिमदिव्यप्रभावमिव, संप्राप्तनिरुपमपुराकृतसुकृततरुफलास्वादमिव, महोत्साहगजस्कन्धसमारूढमिव, अपगतदुष्पुत्रचिन्ताभारमिव, परमात्मस्वरूपावलोकनकलितवैमल्यमिवात्मानं मन्यमानः शय्यागृहादुत्थायान्तःपुराभिमुखं त्वरि[ त ]तरं ससार ।

तदनु च वाद्यमानमङ्गलतूर्यनिर्घोषैः प्रपञ्च्यमानपञ्चमहाशब्दैर्निर्भरव्याप्तसकलभुवनतलतया कथमप्यनाकर्णितत्वरमाणतरुणीजनविज्ञप्तिवचनपरंपरः, कयाचित्करकमले विधृत्य बलादाकृष्यमाणः, कयाचिदुत्साहावेदनमिषेण रभसोत्तरङ्गमालिङ्ग्यमानः, कयाचिन्निजकरकलितकुसुममालिकया ताड्यमानः, कयाचित् हर्षोत्कर्षपरवशया कूर्चे धृ( ध्रि )यमाणः, कयाचिदुत्तरीयाञ्चलपल्लवेऽवलम्ब्यमानः, कयाचित्करकमलवक्राङ्गुलीविकारैरुपहस्यमानः, कयाचिदाकुञ्चितकरसरसिजसंज्ञया क्षिप्रमाहूयमानः, कयाचिद् 'देव दिष्ट्या वर्द्धसे वेगेन धाव धाव' इत्यभिधीयमानः, कयाचिद् 'देव फलितोऽद्य ते मनोरथतरुः, पारितोषिकं वितर' इति सोल्लासमालप्यमानः,

## [ ज्योतिर्विदां शुभाशंसनम् ]

सम्यगधिगतपौरशरोमशसौरवासिष्ठपैतामहत्रिस्कन्धबन्धुरज्योतिःशास्त्रैः, गार्ग्यवराहमिहिरादिसंहितातत्त्वज्ञैः, होरासारविचक्षणैः, ग्रहगतिगणितलग्ननिपुणैः, नष्टजातकानयनचतुरैः, दिग्भूमिबलवेदिभिः, स्वरशकुननिमित्तविशारदैः, नामान्तकेवलीचूडामणिप्रवीणैः, सामुद्रकलक्षणविचक्षणैः, बहुशः संवादितातीतानागतातीन्द्रियवर्तमानार्थसार्थैः, दैवज्ञनिवहैः 'पार्थिव

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कृतार्थोऽसि निरतिशयतनयजन्मलाभेन, यस्मात् शुभस्थानस्थितेषु नवस्वपि ग्रहेषु, प्रत्यग्रे शुभनक्षत्रे यस्मिन् समुत्पन्नः सप्तजलनिधिमालामेखलायाः पुष्करद्वीपपर्यन्तायाः क्षितेः पालयिता भवति, सकलानपि दिक्पालान् प्रतापानलविलसिताक्रम्यमाणानाज्ञावशवर्त्तिनो वितनोति, सर्वानपि गर्वभरपरवशान् करतलकलितकरालकरवाललेखया राष्ट्रकूटकण्टकानुत्पा( ट्य )निजकीर्तिवल्लभायाः स्वेच्छाविहरणयोग्यां विश्वंभरां करोति, धर्म्यकर्मक्रियानिवारितकलिकालप्रचारः कृतयुगाचारं प्रवर्त्तयति; किं बहुना यत्र सगरभगीरथनलनहुषाम्बरीषमान्धातृरामचन्द्रैरपि न जन्मावापि तथाविधे प्रवर्त्तमाने सुमुहूर्त्ते सकलक्षत्रलक्षणसमुपलक्षितगात्रं, आनन्दितसकलजननेत्रं, करनलिनोपलक्ष्यमाणशङ्खचक्रकमलमीनादिलक्ष्मीपतिचिह्नं, दीर्घायुषमनामयं, शोभनेऽह्नि देवी पुत्रमवाप ' इति विज्ञप्यमानः,

## [ पुरोधस आशीर्वचनम् ]

वामहस्तविन्यस्तललितमातुलिङ्गफलप्रकटितमाङ्गलिक्येन, दक्षिणकराम्बुरुहकलितसदूर्वाक्षतदक्षिणावर्तकम्बुना, वेदध्वनिमुखरमुखब्राह्मणशतपरिवृतेन, सर्वदा सत्याशिषा, विहितसप्ततन्तुनाप्यगणिततन्तुसन्तानेन, प्रतिदिवसप्रवर्त्तमानत्रेताग्निहोत्रधूमस्तोमश्यामलीकृतेनापि सद्यः प्रोञ्छितलाञ्छनेन्दुबिम्बविशदागण्यपुण्यधवलेन, समधिगतसकलप्रमाणशास्त्रविद्येन, सब्रह्मपदनिविष्टमतिनाऽप्यस्थानाभिनिवेशेन, विहितबहुमखेनापि दूरीकृतमन्युना, धौतदुकूलपटावगुण्ठिततया साक्षादिव सुकृतपरंपराभिरालिङ्गितेन, मूर्त्तिमतेव वेदेन, विग्रहवतेवोपशमेन, प्रत्यक्षेणेव धर्मेण, जङ्गमेनेवाचारेण, पुरोधसा श्रीरुद्रमिश्रार्येणाभ्युदयिकपुण्याहसमुचिताशीर्वादमन्त्रैरभिवर्द्धयमानः,

## [ अवनीपतेः प्रसवगृहगमनम् ]

द्वारोभयपार्श्वनिविष्टमुखनिहितहरितसहकारपल्लवशोभमानसलिलपरिपूरितशातकुम्भकुम्भकैर्ब्राह्मणवैरुदीर्यमाणशान्तिकपरंपरं, करकलिततीक्ष्णकरवालमालाकरालवीरभटकृतरक्षाविधानं, प्रसवविधिविशारदाभिः प्रवेशनिःसरणव्याकुलाभिः बान्धववृद्धपुरन्ध्रिभिरध्यासितं, विचित्रनेत्रकाण्डपटपरिघटनोपशोभितद्वारप्रदेशं, स्निग्धाञ्जनपुञ्जविरच्यमानखङ्गधरसुभटाकारपुत्रिकाविचित्रितभित्तिभागं, चतुष्कोणव्य[ व ]स्थापितकृष्णाजाजिनं, हरहसितसितससिद्धार्थभूतिरेखालङ्कृतदेहलीतलं, प्राङ्गणोत्सङ्गपरिपुञ्जितगोमयशिखरविन्यस्तवराटमालं, प्रवेशक्षणचरणाभ्युक्षणोपयुक्तहाटककटाहान्तरविनिक्षिप्तसजलपिचुमन्दपल्लवं, विविधरक्षाविधानोपयुक्ताभिर्महौषधीभिरधिष्ठितं प्रसवगृहमवनीपतिस्तनयमुखकमलावलोकनोत्कलिकाकलितमानसो विवेश ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ कुमारदर्शनम् ]

तत्र च सकलतीर्थनिर्मलजलैर्यथाविधि पुरोधसा विरचितसचैलस्नानः, श्रद्धापूर्वकविधीयमाननान्दीमुखश्राद्धवितीर्यमाणबहुसुवर्णानन्यमानब्राह्मणगणं ब्राह्मणैः सह अन्तर्भवनं प्रविश्य कृष्णकम्बलाच्छादितस्वच्छतनुलतायाः रचिताञ्जनविशेषकायाः मस्तकन्यस्तसिद्धार्थाऽक्षतायाः देव्याः सन्निधौ सितपटावगुण्ठितशूर्पतल्पमध्यमध्यासीनं क्षीरसागरतरङ्गसङ्गतानन्तभोगशायिनमिव बालरूपधारिणं नारायणं, गीर्वाणतरङ्गिणीविमलतरकल्लोलकलापसमुद्भूतमिव कुमारं, नितान्तसुकुमारं कुमारपश्यत् ॥ छ ॥

तदनु शुभमुहूर्त्ते नन्दनस्याननेन्दुं
नरपतिरवलोक्य प्रीतिमन्तर्बभार ।
अभिनवविधिनेव व्यज्यते यत्र चित्रं
शशिसरसिजलक्ष्म्योरेकवासाविरोधः ॥

देवस्तदैवोत्तमचक्रवर्तिचिह्नानि बालस्य करे विलोक्य ।
साम्राज्यभारोद्वहने स्वबाहु[1]मवाप्तविश्रान्तिममन्यतान्तः ॥

नूतनोदयवता सतेजसा लोचनोत्सवकरेण देव्यपि ।
पूर्वभूभृदवनीव भानुना सूनुना सविधवर्त्तिना बभौ ॥

सफलया लतयेव महीरुहः शशिजुषा निशयेव दिनात्ययः ।
स धरणीपतिरभ्यधिकां श्रियं दयितया तनयान्वितयाभजत् ॥

श्रवणमधुरसर्पद्गायकश्रव्यगीतं
स्तुतिशतपटुभावद्वन्दिवृन्दानुयातम् ।
सुकविघटितचाटुश्लोकपाठाभियोगं
नरपतिगृहमासीदुत्सवोत्साहशंसि[2] ॥

क्वापि प्रोद्यदमन्ददुन्दुभिरवं निःसंख्यशङ्खध्वनि
क्वापि क्वापि सकांस्यतालनिवहं क्वाप्युल्लसत्काहलम् ।
क्वापि क्वापि विचित्रतूर्यनिवहप्रारब्धकोलाहलं
पुत्रोत्साहमिव प्रकाशयदभूद्भूपालगेहं तदा ॥

[ उल्लाससमाप्तिः ? ]

---

1 MS. has -भाहु- of which 'हु' is partly visible.

2 -दुच्छवोच्छाहसंशि MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ जातकर्मादिसंस्काराः ]

अनन्तरं च संमिश्रिते मधुसर्पिषी निरुपमरत्नखचितजातरूपाङ्गुलीयकाग्रभागेन बालकस्य वदनकमले निधाय वेदमन्त्रोच्चारणपूर्वकं जनन्याः स्तन्यपाने स्वहस्तेन नियुज्याभिमतदेवताभिधानमनन्यनिवेदनीयं शिशोर्नामधेयं देव्याः कर्णे निवेद्याभ्यर्णवर्तिभिरमात्यपुरोहितान्तःपुराधिकारिभिः सह सहसितवदनस्तस्मात् प्रसूतिकासदनादवनिपतिर्निरगमत् ।

## [ धनादिदानम् ]

ततः सबहुमानं महीपतिरभिमततनयजननोत्सवोत्साहितान्तःकरणो गणकगणस्य भिषजां प्रसवकारिण्याः किमपरमपरासामप्यन्तःपुरसञ्चारिणीनां बान्धववृद्धपुरन्ध्रीणामवरोधाध्यक्षवृद्धकञ्चुकिनां पुरोहितामात्यमहत्तरमन्त्रिप्रभृतीनां मान्यपुरुषाणां कविगमकिवादिवाग्मिसन्दोहानां सूतमागधवन्दिवृन्दानां गन्धर्ववराणां ततविततवनसुषिरावनद्धवाद्यविद्याविशारदानां पटुतरमङ्गलपाठकानां च काञ्चनसञ्चयसुवर्णकङ्कणरत्नमयविभूषणकमनीयवसनगजतुरगोत्तमग्रामजनपदानदात् । किं बहुना यस्य यस्य यद्यद[1]भिमतमासीत्तस्य तस्य तत्तदपरिमितमपरमपि तदा प्रददौ ।

## [ नामकर्मसंस्कारः ]

अथ संप्राप्ते त्रयोदशेऽहनि शुभतरमुहूर्त्ते प्रवर्त्तमानेषूत्साहसकलमाङ्गलिक्यतूर्यरवेषु प्रवर्द्धमानासु ब्राह्मणगणानामाशीर्वादपरंपरासु परां कोटिमारोहत्सु पौरनिवहानामुत्साहेषु त्रिविक्रमावतारोऽयमयमेव निजविक्रमाक्रान्तसकलधरणिमण्डलो निरुपमप्रतापप्रसरेण समुत्सारितप्रतिवसुन्धराधिपान्धकारनिकरो भविष्यतीति कुमारस्य समुचितमवनीपतिर्विक्रमादित्यचक्रवर्तीति नाम चक्रे ।

## [ बालवृद्धिः ]

स च क्रमेण तरङ्गिणीनायक इव प्रतिदिवससमासादितराजसमागमः कमपि परिपोषमवाप । निशीथिनीनाथ इव निखिलजननयनानन्दजननसुभगकान्तिः सकल जगद( नु )रागेण सार्धमवर्धत । अभ्रमूवल्लभदानाम्भःप्रवाह इव परितोषितविबुधनिवहः समुल्लास । कल्पलताप्ररोह इवानल्पविकासशाली नन्दनचूडामणिर्ननन्द । सुरसरित्पूर इव सरससार-

---

1 यद्यद- MS.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वतामृतः प्रससार । सज्जनतासमागम इव निकाममप्रियदर्शनः प्रतिदिनं विचकास । किं वहुना लक्ष्मीपतेस्त्रैविक्रमः काय इवाप्रतिमप्रभावो व्यजृम्भत ॥ ६ ॥

तथाविधस्य क्षितिपालसूनोर्मुखेन्दुमालोक्य नितान्तकान्तम् ।
तातस्य सन्तोषरसोत्तरङ्गः सदा मनोवार्धिरवर्द्धतोच्चैः ॥

## [ वाललीलाः ]

स च वालकः प्रेङ्खोलिकायामात्मनः पृष्ठं विषमस[ म ]रसमये न कस्यापि दर्शयिष्यामीति निवेदयितुमिवोत्तानशयनः, निरन्तरं निखिलातीतराजधर्मान् दृढतरं धारयिष्यामीति संज्ञया दर्शयन्निव सततकृतमुष्टिः, सहायनिरपेक्षः स्वभुजवलोपार्जितानेव राज्यभोगानहमुपभोक्ष्य इति प्रकाशयितुमिव कराङ्गुलिं वदनकमले चिक्षेप ।

## [ विविधसंस्काराः ]

क्रमेण जाते षष्ठे मासि महामौहूर्त्तिकजनोपदिष्टश्रेष्ठतमे दिवसे प्रवर्त्तमाने सकलाभ्युदयभाजिमुहूर्ते वेदविधिना विविधदानपुरःसरमवनीपतिः कुमारस्यान्नप्राशनमकारयत् ।

तदनन्तरं पुरन्दरसततमदसिन्धुरप्रमुखानामखिलानामपि दिग्गजानां प्रभावमभिभूया( ह )मेव सकलमहीमण्डलभरमुद्वहामीति प्रथयन्निव पृथिवीतलविरचितजानुचङ्क्रमणो गजलीलया सलीलं चक्राम । न कदाचिदपि निरर्गलमनुमार्गमग्रे जहामीति निरूपयन्निव निरुपमललितपदक्रमतया सकलजनसंमतश्चलितुमारेभे ।

तदनु सकलजगदभिलषितसंपादनसमर्थावितथवचनो भविष्यामीति दर्शयन्निवामृतरसस्यन्दसिक्तमव्यक्ताक्षरमवादीत् । 'देव, कस्ते पिता' इति समीपस्थैः पृष्टः स्पष्टतरमवनिपतिमङ्गुल्या निर्दिशन् समासादितसंसारसारमिव समुल्लसदसमसंमदरसविसरं पृथिवीधरमकरोत् ।

स च —अकारणक्रोधपरः कदापि
कदाप्यहेतोर्हसितं दधानः ।
प्रहर्षविस्फारितवक्त्रकान्तिर्-
बालः पितुर्मानसमाचकर्ष ॥

स च क्रीडासरोवरावस्थितं हंसयूथं रमणीयतरान्तःपुररमणीजननूपुरझाङ्कारसमागतं समीपमुपगत्य दूरतरमपसारयन्नग्रेतनं निखिलरिपुराजहंसप्रवासनमिवाभ्यधत्त । प्रकटितविचित्र-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तरमयूरपत्रनिवहः पृथिवीश्वरस्य नेत्रोत्सवमासूत्रयन् सातिशयं कुमारभावमदर्शयत् । सहजकोमलकुटिलकुन्तलजटाकलापविराजमानोत्तमाङ्गस्त्वङ्गदुल्लासिपाशुकेलीप्रकटितविभूतिरुद्धुतकिङ्किणीक्वणितरमणीयलीलापरिभ्रमणः प्रकाशितनैसर्गिकगुणगणः प्रदर्शितेश्वरलीलोऽप्यनुग्रतया सकलजनानन्दमजनयत् ।

तदनन्तरं च विधिनियमितप्रमाणे वयसि वर्तमानस्य तस्य बालकस्यागणितद्रविणव्ययपुरःसरं सकललोकलोचनोत्सवकरमशेषविश्वम्भराधीशचूडामणिश्चूडाकरणशोभनं चकार । तं च समुचितवर्षप्रारंभसंभाविताभिः श्यामायमानमेघलेखाभिरिव अस्य समस्तगुणरत्ननिधेः परिरक्षणतत्परस्य कुलाधिदे[1]वतसितेतरभोगिनः पञ्चफणाभिरिव निगूहितवदनचतुष्टयस्य प्रकटीकृतैकवदनाम्बुजस्यापि व्यञ्जयन्तीभिरिवेश्वरभावं पञ्चभिः शिखाभिरुद्भासमानं तं तनयमवलोक्य मेदिनीपतिः परं मुमुदे । एवं प्रतिदिनप्रवर्द्धमानजनकस्नेहेन सकलगुणमयः कुलदीपक इव प्रावर्द्धत ।

प्राप्ते गर्भैकादशवर्षे शुभदिनमुहूर्त्ते विधिना वसिष्ठगोत्रसमुद्भवेन पुरोधसा रुद्रमिश्रेण ब्राह्मणवरेण कुलदेवतानमस्कारपूर्वकेण कुमारस्योपनयनमकारयत् । द्विधा गौराहिपरिवेष्टितगुणरत्ननिधिरिव ललितपरिधृत[2]मौर्वीमेखलः गृहीतोदुम्बरकाष्ठः सप्तसमुद्रमुद्रितधरामण्डलं प्रमातुं समुद्यत इव विधृतमानदण्डः, स्कन्धावलम्बिना रौहितोत्तरीयेण प्रतिभासमानः सपरिवेष इव मार्तण्डमण्डलः, धूमलेखालङ्कृतजातवेदा इव विराजितैककाकपक्षः, वामहस्तविन्यस्तकनकपात्रतया त्रिलोकीसुखमुपभोक्तुमुद्यत इवादितितनयः, क्षत्रियोऽपि विश्वामित्र इव ब्रह्मणस्तेजसा प्रकाशमानो व्यराजत ।

## [ विद्याभ्यासः ]

अथ चतुर्थेऽहनि निर्वर्त्तितसमावर्त्तनविधिं कुमारकं विद्याभ्यसनाय धनुर्वेदपरिज्ञानाय चक्रविद्याचमत्काराय कौक्षेयकशिक्षावैचक्षण्याय असिधेनुगतत्रयचमत्कारचातुर्याय, शस्त्रिकासञ्चारपाटवप्रकटनाय, कुन्तविद्यानितान्तकौशलाय, गदायुधमण्डलविधिवैदग्ध्याय, मल्लयुद्धविविधबन्धविज्ञानाय, किं बहुना सकलकलाकलापाभ्यासाय समस्तविद्याचार्येषु समर्पयामास ।

अथ कतिपयैरेवाब्दैर्यथा सर्वाश्च[ कलाः ]कलाधरं, सर्वाश्च सरितः सागरं, सर्वाश्च संपदो नयविदं, सर्वाश्च योषितः कामकलाकोविदं, सर्वाश्चाप्सरसः शतमखं, तथैव सर्वाश्च विद्याः प्राक्तनजन्मपरिचयादेव तं कुमारकमुपययुः ।

---

1 -कुलाभिदे- MS. 2 -परिवृत-.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ कान्तिभिर्मणिरिव, भानुभिर्भानुरिव, ज्वालाभिर्वह्निरिव, फणाभिः शेष इव, जटाभिः शङ्कर इव, शाखाभिः कल्पतरुरिव, विद्याभिः स कुमारो विरेजे ।

तदनन्तरं महाराजस्तनयस्य वीरलक्ष्मीस्वयम्वर इव क्षुरिकाबन्धनोत्सवमकार्षीत् ।

## [ यौवराज्यपदाभिषेकः ]

ततः प्राप्ते षोडशे वर्षे विबुधसंरक्षणपरस्तारकसंहरणाय प्रतारकराजकमुपसंहर्तुममरराज इव राजा कुमारकं यौवराज्यमध्यभिषिषेच ।

## [ दिग्विजयप्रयाणम् ]

यशोवृद्धये धनसमृद्धये परराष्ट्राहरणाय शत्रुसंहरणाय मित्रानुग्रहणाय रत्नसंग्रहणाय शरणागतसंरक्षणाय प्रतापाग्निसंधुक्षणाय जगद्दारिद्र्यमोक्षणाय निजतनयशौर्यनिरीक्षणाय मन्त्रिभिः सह समालोच्य कुमारः प्रस्थापनीय इति राजा निश्चितमन्त्रः समभवत् ।

तदनन्तरं मौहूर्त्तिकसमूहमाहूय 'प्रियपुत्रस्य दिग्विजयाय प्रशस्तो दिवसो निरीक्षणीयः' इत्यादिदेश । ततस्तैः शुभमुहूर्ते शीर्षोदये सिंहलग्ने, गुरूदये लाभस्थानगते रवौ षष्ठस्थानगतयोः सौरिभौमयोः शुक्रबुधयोरनुकूलयोः सप्तमे शशिनि विजयदशम्यां यात्रादिवसः प्रशस्त इति मौहूर्त्तिकैर्विज्ञप्तः ।

ततो राजा महामात्यमाहूय राजपथमपगतकाष्ठमपनीतभसितमपहृताङ्गारमुत्सारितास्थिशकलं दूषित[1]तुषं, संमार्जितावकरं, मूकान्धबधिरक्लीबविप्रुविकर्णमुण्डितावगुण्ठितपतितार्त्तव्याधितविकीर्णकेशतैलाभ्यक्तगात्रमहिषगर्दभारूढमर्कटमार्जारक्षपणक्रूरमृगादिरहितं कुरुष्व । अन्यच्च क्षुतरुदितक्रोशापशब्दगालिप्रदानप्रतिकूलवचनादीन्यसमीचीनभाषितानि निवारयितव्यानि । यानि च दधिकुम्भाम्भःकलशमधुघटादीन् [-नि मङ्गलानि तानि ?] दर्शय । मुकुराम्बरपल्लवतोरणादीनुन्नामय । प्रतिगृहं प्राङ्गणेषु विचित्ररङ्गवल्लीविशेषान् सपुष्पप्रकारान् विरचय । अन्यान्यपि [यानि] मङ्गलदर्शनानि तानि सर्वाण्यपि त्वरिततरं प्रकटयेत्याज्ञापयामास ।

सोऽपि तत्क्षणादेव 'महान् प्रसादः' इति सकलमङ्गलमयं घण्टापथमकरोत् । ततः सकलसेनासंवाहनाय वाहिनीपतिमाहूय 'करितुरगरथपदातिमौलभृत[ भट ? ]श्रेण्याटविक-

1 -दूरित- MP.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मित्रबलपरिवर्द्धितां कुमारस्य निजसामग्रीं सन्नाहय । अन्यान्यपि राजकमहामण्डलेश्वरसामन्तमान्यकसैन्यानि सहितानि पुरतो विधाय कुमारेण सह त्वमपि प्रतिष्ठस्व ' इत्यादिदेश ।

ततः प्राप्ते तस्मिन् दिवसे पुरोहितप्रमुखैर्ब्राह्मणवरैः पुण्याङ्गनाभिः सह दधिदूर्वाक्षतकुसुमैरुत्तमाङ्गमलं........

[ मूलमत्रैव विरमति । —संपादकः ]

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust